NADAYOGA
STOTRA MALA



AKSHARA VIDYA TRUST, CHENNAI

First Print: 2009, 500 copies

Second Print: 2017, 1000 copies

©Akshara Vidya Trust

Published by and for copies

AKSHARA VIDYA TRUST,
New No 15 (Old No 7/1)
Mahalakshmi St. T. Nagar, Chennai – 600 017
Tel: 044 24328087
Web: www.swaminisatyavratananda.org

Printed by:

Vignesha Printers,
Triplicane, Chennai - 600 005.
Cell : 98400 16655

विषयसूची

1.	श्रीगणेशपञ्चरत्नम्	1
2.	श्रीगणेशस्तोत्रम्	2
3.	प्रातः स्मरणम्	3
4.	श्रीगुरुस्तोत्रम्	3
5.	श्रीगुरुपादुकास्तोत्रम्	5
6.	तोटकाष्टकम्	6
7.	गुर्वष्टकम्	7
8.	श्रीतपोवनषट्कम्	9
9.	दक्षिणामूर्तिध्यानम्	10
10.	दक्षिणामूर्तिस्तोत्रम्	11
11.	श्रीदयानन्दपञ्चकम्	13
12.	श्रीरामायणवन्दनम्	14
13.	श्रीरामस्तोत्रम्	15
14.	श्रीसीतारामयोर्ध्यानं वन्दनं च	16
15.	श्रीहनुमत्पञ्चरत्नम्	16
16.	श्रीहनुमन्नमस्कारः	17

17.	दशावतारस्तोत्रम्	18
18.	गीताध्यानम्	20
19.	गीतामाहात्म्यम्	21
20.	बालमुकुन्दाष्टकम्	25
21.	श्रीकृष्णाष्टकम्	26
22.	मधुराष्टकम्	27
23.	अच्युताष्टकम्	28
24.	शिवपञ्चाक्षरस्तोत्रम्	30
25.	लिङ्गाष्टकम्	31
26.	श्रीमार्गबन्धुस्तोत्रम्	32
27.	काशीविश्वनाथस्तोत्रम्	33
28.	पतञ्जलिकृतनटराजस्तोत्रम्	35
29.	श्रीचन्द्रशेखराष्टकम्	37
30.	शिवमानसपूजा	39
31.	कालभैरवाष्टकम्	40
32.	श्रीकार्तिकेयस्तोत्रम्	42
33.	शारदास्तोत्रम्	43

34.	कमलजदयिताष्टकम्	44
35.	महालक्ष्म्यष्टकम्	46
36.	श्रीकनकधारास्तोत्रम्	47
37.	श्रीमहिषासुरमर्दिनीस्तोत्रम्	51
38.	श्रीअन्नपूर्णास्तोत्रम्	55
39.	मीनाक्षीपञ्चरत्नम्	58
40.	श्रीगङ्गास्तोत्रम्	59
41.	देव्यपराधक्षमापणस्तोत्रम्	61
42.	भवान्यष्टकम्	63
43.	आदित्यहृदयम्	64
44.	उपदेशसारम्	68
45.	भज गोविन्दम्	72
46.	निर्वाणषट्कम्	75
47.	मङ्गलाष्टकम्	76
48.	पूर्णकुंभमन्त्राः	78
49.	Publications of AKshara Vidya Trust	79

PREFACE

Hari Om!

Prayer is the highest form of expression of our feelings to Ishvara, the sustainer of this entire Cosmos. This prayer can be done by us either physically with the limbs of our body (Puja – Physical Worship; Pradakshina – Circumambulations; or Namaskara) or through words of praise (Stotra; Sloka; Bhajana, Namasmarana); or as mental prayer.

There will be results for the prayer that we do, without fail.

Nada Yoga is the prayer that we do verbally.

Through such Nada Yoga, we can get worldly benefits (both seen – Drishta and unseen – Adrishta); mental peace, calmness and purity.

Prayers that we initially commence for worldly benefits, will steadily progress and transform from Aarta to Arthaarthi to Jijnaasu Bhakti and will ultimately assist in acquiring Self-Knowledge.

Om Tat Sat

।। श्री गणेशपञ्चरत्नम् ।।

1. मुदा करात्तमोदकं सदा विमुक्तिसाधकं
   कलाधरावतंसकं विलासिलोकरक्षकम् ।
   अनायकैकनायकं विनाशितेभदैत्यकं
   नताशुभाशुनाशकं नमामि तं विनायकम् ।।

2. नतेतरातिभीकरं नवोदितार्कभास्वरं
   नमत्सुरारिनिर्जरं नताधिकापदुद्धरम् ।
   सुरेश्वरं निधीश्वरं गजेश्वरं गणेश्वरं
   महेश्वरं तमाश्रये परात्परं निरन्तरम् ।।

3. समस्तलोकशङ्करं निरस्तदैत्यकुञ्जरं
   दरेतरोदरं वरं वरेभवक्त्रमक्षरम् ।
   कृपाकरं क्षमाकरं मुदाकरं यशस्करं
   मनस्करं नमस्कृतां नमस्करोमि भास्वरम् ।।

4. अकिञ्चनार्तिमार्जनं चिरन्तनोक्तिभाजनं
   पुरारिपूर्वनन्दनं सुरारिगर्वचर्वणम् ।
   प्रपञ्चनाशभीषणं धनञ्जयादिभूषणं
   कपोलदानवारणं भजे पुराणवारणम् ।।

5. नितान्तकान्तदन्तकान्तिमन्तकान्तकात्मजं
अचिन्त्यरूपमन्तहीनमन्तरायकृन्तनम् ।
हृदन्तरे निरन्तरं वसन्तमेव योगिनां
तमेकदन्तमेव तं विचिन्तयामि सन्ततम् ।।

6. महागणेशपञ्चरत्नमादरेण योऽन्वहं
प्रजल्पति प्रभातके हृदि स्मरन् गणेश्वरम् ।
अरोगतामदोषतां सुसाहितीं सुपुत्रतां
समाहितायुरष्टभूतिमभ्युपैति सोऽचिरात् ।।

* * *

।। श्री गणेशस्तोत्रम् ।।

1. अजं निर्विकल्पं निराकारमेकं निरानन्दमानन्दमद्वैतपूर्णम् ।
परं निर्गुणं निर्विशेषं निरीहं परब्रह्मरूपं गणेशं भजेम ।।

2. गुणातीतमानं चिदानन्दरूपं चिदाभासकं सर्वगं ज्ञानगम्यम् ।
मुनिध्येयमाकाशरूपं परेशं परब्रह्मरूपं गणेशं भजेम ।।

3. जगत्कारणं कारणज्ञानरूपं सुरादिं सुखादिं गुणेशं गणेशम् ।
जगद्व्यापिनं विश्ववन्द्यं सुरेशं परब्रह्मरूपं गणेशं भजेम ।।

* * *

।। प्रातः स्मरणम् ।।

1. प्रातःस्मरामि हृदि संस्फुरदात्मतत्त्वं सच्चित्सुखं परमहंसगतिं तुरीयम् ।
यत्स्वप्नजागरसुषुप्तमवैति नित्यं तद्ब्रह्मनिष्कलमहं न च भूतसंघः ।।

2. प्रातर्भजामि मनसो वचसामगम्यं वाचो विभान्ति निखिलायदनुग्रहेण ।
यन्नेतिनेति वचनैर्निगमा अवोचुः तं देवदेवमजमच्युतमाहुरग्र्यम् ।।

3. प्रातर्नमामि तमसःपरमर्कवर्णं पूर्णं सनातनपदं पुरुषोत्तमाख्यम् ।
यस्मिन्निदं जगदशेषमशेषमूर्तौ रज्ज्वांभुजंगम इवप्रतिभासितं वै ।।

* * *

।। श्री गुरुस्तोत्रम् ।।

1. अखण्डमण्डलाकारं, व्याप्तं येन चराचरम् ।
तत्पदं दर्शितं येन, तस्मै श्रीगुरवे नमः ।।

2. अज्ञानतिमिरान्धस्य, ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन, तस्मै श्रीगुरवे नमः ।।

3. गुरुर्ब्रह्मा गुरुर्विष्णुः, गुरुर्देवो महेश्वरः ।
गुरुरेव परं ब्रह्म, तस्मै श्रीगुरवे नमः ।।

4. स्थावरं जङ्गमं व्याप्तं, यत्किञ्चित्सचराचरम् ।
तत्पदं दर्शितं येन, तस्मै श्रीगुरवे नमः ।।

5. चिन्मयं व्यापियत्सर्वं, त्रैलोक्यं सचराचरम् ।
तत्पदं दर्शितं येन, तस्मै श्रीगुरवे नमः ।।

6. सर्वश्रुतिशिरोरत्न, विराजितपदाम्बुजः ।
वेदान्ताम्बुजसूर्यो यः, तस्मै श्रीगुरवे नमः ।।

7. चैतन्यश्शाश्वतश्शान्तः, व्योमातीतोनिरञ्जनः ।
बिन्दुनादकलातीतः, तस्मै श्रीगुरवे नमः ।।

8. ज्ञानशक्तिसमारूढः, तत्त्वमालाविभूषितः ।
भुक्तिमुक्तिप्रदाता च, तस्मै श्रीगुरवे नमः ।।

9. अनेकजन्मसम्प्राप्त, कर्मबन्धविदाहिने ।
आत्मज्ञानप्रदानेन, तस्मै श्रीगुरवे नमः ।।

10. शोषणं भवसिन्धोश्च, ज्ञापनं सारसम्पदः ।
गुरोःपादोदकं सम्यक्, तस्मै श्रीगुरवे नमः ।।

11. न गुरोरधिकं तत्त्वं, न गुरोरधिकं तपः ।
तत्त्वज्ञानात्परं नास्ति, तस्मै श्रीगुरवे नमः ।।

12. मन्नाथःश्रीजगन्नाथः, मदुरुःश्रीजगदुरुः ।
मदात्मासर्वभूतात्मा, तस्मै श्रीगुरवे नमः ।।

13. गुरुरादिरनादिश्च, गुरुःपरमदैवतम् ।
गुरोःपरतरं नास्ति, तस्मै श्रीगुरवे नमः ।।

14. त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च सखा त्वमेव ।
त्वमेव विद्या द्रविणं त्वमेव त्वमेव सर्वं मम देवदेव ।।

* * *

।। श्री गुरुपादुकास्तोत्रम् ।।

1. अनन्तसंसारसमुद्रतारनौकायिताभ्यां गुरुभक्तिदाभ्याम् ।
वैराग्यसाम्राज्यदपूजनाभ्यां नमो नमःश्रीगुरुपादुकाभ्याम् ।।

2. कवित्ववाराशिनिशाकराभ्यां दौर्भाग्यदावाम्बुदमालिकाभ्याम् ।
दूरीकृतानम्रविपत्ततिभ्यां नमो नमःश्रीगुरुपादुकाभ्याम् ।।

3. नता ययोःश्रीपतितां समीयुः कदाचिदप्याशु दरिद्रवर्याः ।
मूकाश्च वाचस्पतितां हि ताभ्यां नमो नमःश्रीगुरुपादुकाभ्याम् ।।

4. नालीकनीकाशपदाहृताभ्यां नानाविमोहादिनिवारिकाभ्याम् ।
नमज्जनाभीष्टततिप्रदाभ्यां नमो नमःश्रीगुरुपादुकाभ्याम् ।।

5. नृपालिमौलिव्रजरत्नकान्ति सरिद्विराजज्झषकन्यकाभ्याम् ।
नृपत्वदाभ्यां नतलोकपंक्तेः नमो नमःश्रीगुरुपादुकाभ्याम् ।।

6. पापान्धकारार्कपरम्पराभ्यां तापत्रयाहीन्द्रखगेश्वराभ्याम् ।
जाड्याब्धिसंशोषणवाडवाभ्यां नमो नमःश्रीगुरुपादुकाभ्याम् ।।

7. शमादिषट्कप्रदवैभवाभ्यां समाधिदानव्रतदीक्षिताभ्याम् ।
रमाधवांघ्रिस्थिरभक्तिदाभ्यां नमो नमःश्रीगुरुपादुकाभ्याम् ।।

8. स्वार्चापराणामखिलेष्टदाभ्यां स्वाहासहायाक्षधुरन्धराभ्याम् ।
स्वान्ताच्छभावप्रदपूजनाभ्यां नमो नमःश्रीगुरुपादुकाभ्याम् ।।

9. कामादिसर्पव्रजगारुडाभ्यां विवेकवैराग्यनिधिप्रदाभ्याम् ।
बोधप्रदाभ्यां द्रुतमोक्षदाभ्यां नमो नमःश्रीगुरुपादुकाभ्याम् ।।

* * *

।। तोटकाष्टकम् ।।

1. विदिताखिलशास्त्रसुधाजलधे महितोपनिषत्कथितार्थनिधे ।
हृदये कलये विमलं चरणं भव शंकर देशिक मे शरणम् ।।

2. करुणावरुणालय पालय मां भवसागरदुःखविदूनहृदम् ।
रचयाखिलदर्शनतत्त्वविदं भव शंकर देशिक मे शरणम् ।।

3. भवता जनता सुहिताभविता निजबोधविचारणचारुमते ।
कलयेश्वरजीवविवेकविदं भव शंकर देशिक मे शरणम् ।।

4. भव एव भवानिति मे नितरां समजायत चेतसि कौतुकिता ।
मम वारय मोहमहाजलधिं भव शंकर देशिक मे शरणम् ।।

5. सुकृतेऽधिकृते बहुधा भवतो भविता समदर्शनलालसता ।
अतिदीनमिमं परिपालय मां भव शंकर देशिक मे शरणम् ।।

6. जगतीमवितुं कलिताकृतयो विचरन्ति महामहसश्छलतः ।
अहिमांशुरिवात्र विभासि गुरो भव शंकर देशिक मे शरणम् ।।

7. गुरुपुंगव पुंगवकेतन ते समतामयतां नहि कोऽपि सुधीः ।
शरणागतवत्सल तत्त्वनिधे भव शंकर देशिक मे शरणम् ।।

8. विदिता न मया विशदैककला न च किञ्चन काञ्चनमस्ति गुरो ।
द्रुतमेव विधेहि कृपां सहजां भव शंकर देशिक मे शरणम् ।।

* * *

।। गुर्वष्टकम् ।।

1. शरीरं सुरूपं तथा वा कलत्रं यशश्चारुचित्रं धनं मेरुतुल्यम् ।
गुरोरङ्घ्रिपद्मे मनश्चेन्न लग्नं ततःकिं ततःकिं ततःकिं ततःकिम् ।।

2. कलत्रं धनं पुत्रपौत्रादि सर्वं गृहं बान्धवाःसर्वमेतद्धिजातम् ।
गुरोरङ्घ्रिपद्मे मनश्चेन्न लग्नं ततःकिं ततःकिं ततःकिं ततःकिम् ।।

3. षडङ्गादिवेदो मुखे शास्त्रविद्या कवित्वादि गद्यं सुपद्यं करोति ।
गुरोरङ्घ्रिपद्मे मनश्चेन्न लग्नं ततःकिं ततःकिं ततःकिं ततःकिम् ।।

4. विदेशेषु मान्यःस्वदेशेषु धन्यः सदाचारवृत्तेषु मत्तो न चान्यः ।
गुरोरङ्घ्रिपद्मे मनश्चेन्न लग्नं ततःकिं ततःकिं ततःकिं ततःकिम् ।।

5. क्षमामण्डले भूपभूपालवृन्दैःसदा सेवितं यस्य पादारविन्दम् ।
गुरोरङ्घ्रिपद्मे मनश्चेन्न लग्नं ततःकिं ततःकिं ततःकिं ततःकिम् ।।

6. यशो मे गतं दिक्षुदानप्रतापाज्जगद्वस्तु सर्वं करे यत्प्रसादात् ।
गुरोरङ्घ्रिपद्मे मनश्चेन्न लग्नं ततःकिं ततःकिं ततःकिं ततःकिम् ।।

7. न भोगे न योगे न वा वाजिराजौ न कान्तामुखे नैव वित्तेषु चित्तम् ।
गुरोरङ्घ्रिपद्मे मनश्चेन्न लग्नं ततःकिं ततःकिं ततःकिं ततःकिम् ।।

8. अरण्ये न वा स्वस्य गेहे न कार्ये न देहे मनो वर्तते मे त्वनर्घ्ये ।
गुरोरङ्घ्रिपद्मे मनश्चेन्न लग्नं ततःकिं ततःकिं ततःकिं ततःकिम् ।।

9. अनर्घ्याणि रत्नानि मुक्तानि सम्यक् समालिङ्गिता कामिनी यामिनीषु ।
गुरोरङ्घ्रिपद्मे मनश्चेन्न लग्नं ततःकिं ततःकिं ततःकिं ततःकिम् ।।

10. गुरोरष्टकं यःपठेत्पुण्यदेही यतिर्भूपतिर्ब्रह्मचारी च गेही ।
लभेद्वाञ्छितार्थं पदं ब्रह्मसंज्ञं गुरोरुक्तवाक्ये मनो यस्य लग्नम् ।।

* * *

।। श्री तपोवनषट्कम् ।।

1. व्याप्तं जगद्येन चिदात्मभावाद्रज्ज्वा यथाऽहिर्हि चराचरं यत्
संन्यस्य सर्वं च सदात्मभावे स्वयं समस्तं च बभूव यस्तु ।
निःसङ्ग निर्मुक्तिपदं प्रपद्य ब्रह्मात्मभावेन विराजितो यः
श्रीसौम्यकाशीश महेश्वराय तस्मै नमः स्वामितपोवनाय ।।

2. अखण्डभावःशिवरूपतत्त्वश्चिति स्वभावःपरमात्मसत्यः
सत्यस्य सत्यःसुधियैव गम्यःपरः प्रधानात्परमेश्वरो यः ।
आद्यन्तहीनो निरपेक्षदीप्तिःस्वतः स्वरूपेण विफुल्लितो यः
श्रीसौम्यकाशीश महेश्वराय तस्मै नमः स्वामितपोवनाय ।।

3. मन्तुन्न शक्यो मनसा कदाचिद्वक्तुन्न केनापि तथा न वाचा
बोद्धुश्च बुद्ध्यापि तथा न शक्यो बुद्ध्यादि साक्षी खलु केवलो यः ।
सर्वेन्द्रियातीत पदस्थितोऽपि सर्वेन्द्रिय प्रेरयितापरो यः
श्रीसौम्यकाशीश महेश्वराय तस्मै नमः स्वामितपोवनाय ।।

4. शुद्धातिशुद्धश्च सदाप्रबुद्धो विश्वेश्वरो विश्वपरःप्रसन्नः
व्यापी परब्रह्मणि मोदमानो वेदान्तसारः सुधियां शरण्यः ।
एको वशी सर्वभूताधिवासःसर्वाधिपः सर्वजीवात्मको यः
श्रीसौम्यकाशीश महेश्वराय तस्मै नमः स्वामितपोवनाय ।।

5. अशब्दमस्पर्शमरूपवच्च तथारसं नित्यमगन्धवच्च
निरञ्जनं नित्यनिरीहमेकं बुद्धेः परं निर्गुणसद्भवश्च ।
गुह्यं गभीरं गगनोपमं यं पश्यन्ति निर्द्धूतमला यतीन्द्राः
श्रीसौम्यकाशीश महेश्वराय तस्मै नमः स्वामितपोवनाय ।।

6. तेजोमयं दिव्यममेयशक्तिं सनातनं शान्तमनामयञ्च
अद्वैतमाश्चर्यमचिन्त्यरूपं परात्परं नित्यमनन्तमाद्यम् ।
ज्ञानप्रकाशेन विशुद्धसत्त्वो यं पश्यति स्वात्मनि चिन्त्यमानम्
श्रीसौम्यकाशीश महेश्वराय तस्मै नमः स्वामितपोवनाय ।।

* * *

।। दक्षिणामूर्तिध्यानम् ।।

1. मौनव्याख्याप्रकटितपरब्रह्मतत्त्वं युवानं
वर्षिष्ठान्तेवसदृषिगणैरावृतं ब्रह्मनिष्ठैः ।
आचार्येन्द्रं करकलितचिन्मुद्रमानन्दरूपं
स्वात्मारामं मुदितवदनं दक्षिणामूर्तिमीडे ।।

2. वटविटपिसमीपे भूमिभागे निषण्णं
सकलमुनिजनानां ज्ञानदातारमारात् ।
त्रिभुवनगुरुमीशं दक्षिणामूर्तिदेवं
जननमरणदुःखच्छेददक्षं नमामि ।।

3. चित्रं वटतरोर्मूले, वृद्धाःशिष्या गुरुर्युवा।
गुरोस्तु मौनं व्याख्यानं, शिष्यास्तुच्छिन्नसंशयाः ।।

4. निधये सर्वविद्यानां, भिषजे भवरोगिणाम् ।
गुरवे सर्वलोकानां, दक्षिणामूर्तये नमः ।।

5. ॐनमःप्रणवार्थाय, शुद्धज्ञानैकमूर्तये ।
निर्मलाय प्रशान्ताय, दक्षिणामूर्तये नमः ।।

6. ईश्वरो गुरुरात्मेति, मूर्तिभेदविभागिने ।
व्योमवत्व्याप्तदेहाय, दक्षिणामूर्तये नमः ।।

* * *

।। दक्षिणामूर्तिस्तोत्रम् ।।

1. विश्वं दर्पणदृश्यमाननगरीतुल्यं निजान्तर्गतं
पश्यन्नात्मनि मायया बहिरिवोद्भूतं यथा निद्रया ।
यःसाक्षात्कुरुते प्रबोधसमये स्वात्मानमेवाद्वयं
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ।।

2. बीजस्यान्तरिवाङ्कुरो जगदिदं प्राङ्निर्विकल्पं पुनः
मायाकल्पितदेशकालकलनावैचित्र्यचित्रीकृतम् ।
मायावीव विजृम्भयत्यपि महायोगीव यःस्वेच्छया
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ।।

3. यस्यैव स्फुरणं सदात्मकमसत्कल्पार्थकं भासते
साक्षात्तत्त्वमसीति वेदवचसा यो बोधयत्याश्रितान् ।
यत्साक्षात्करणाद्भवेन्न पुनरावृत्तिर्भवाम्भोनिधौ
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ।।

4. नानाच्छिद्रघटोदरस्थितमहादीपप्रभाभास्वरं
ज्ञानं यस्य तु चक्षुरादिकरणद्वारा बहिःस्पन्दते ।
जानामीति तमेव भान्तमनुभात्येतत्समस्तं जगत्
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ।।

5. देहं प्राणमपीन्द्रियाण्यपि चलां बुद्धिं च शून्यं विदुः
स्त्रीबालान्धजडोपमास्त्वहमिति भ्रान्ता भृशं वादिनः ।
मायाशक्तिविलासकल्पितमहाव्यामोहसंहारिणे
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ।।

6. राहुग्रस्तदिवाकरेन्दुसदृशो मायासमाच्छादनात्
सन्मात्रःकरणोपसंहरणतो योऽभूत्सुषुप्तःपुमान् ।
प्रागस्वाप्समिति प्रबोधसमये यःप्रत्यभिज्ञायते
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ।।

7. बाल्यादिष्वपि जाग्रदादिषु तथा सर्वास्ववस्थास्वपि
व्यावृत्तास्वनुवर्तमानमहमित्यन्तःस्फुरन्तं सदा ।
स्वात्मानं प्रकटीकरोति भजतां यो मुद्रया भद्रया
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ।।

8. विश्वं पश्यति कार्यकारणतया स्वस्वामिसम्बन्धतः
शिष्याचार्यतया तथैव पितृपुत्राद्यात्मना भेदतः ।
स्वप्ने जाग्रति वा य एष पुरुषो मायापरिभ्रामितः
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ।।

9. भूरम्भांस्यनलोऽनिलोऽम्बरमहर्नाथो हिमांशुःपुमान्
इत्याभाति चराचरात्मकमिदं यस्यैव मूर्त्यष्टकम् ।
नान्यत्किञ्चन विद्यते विमृशतां यस्मात्परस्माद्विभोः
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ।।

10. सर्वात्मत्वमिति स्फुटीकृतमिदं यस्मादमुष्मिंस्तवे
तेनास्य श्रवणात्तदर्थमननाद्ध्यानाच्च सङ्कीर्तनात् ।
सर्वात्मत्वमहाविभूतिसहितं स्यादीश्वरत्वं स्वतः
सिद्ध्येत्तत्पुनरष्टधापरिणतं चैश्वर्यमव्याहतम् ।।

* * *

।। श्रीदयानन्दपञ्चकम् ।।

1. सदास्मेरवक्त्रं कृपापूर्णनेत्रं स्थिरं दीनमित्रं जनप्रीतिपात्रम् ।
सुविज्ञातशास्त्रं कषायाक्तवस्त्रं दयानन्दरूपं मदाचार्यमीडे ।।

2. परब्रह्मनिष्ठं स्वतो धर्मनिष्ठं अहिंसैकनिष्ठं स्वशिष्यैः सुजुष्टम् ।
यतीनां वरिष्ठं गुरूणाङ्गरिष्ठं दयानन्दरूपं मदाचार्यमीडे ।।

3. सुशास्त्रे चरन्तं सदासञ्चरन्तं जनान्बोधयन्तं भवादुद्धरन्तम् ।
मठांस्थापयन्तं गुरून्पूजयन्तं दयानन्दरूपं मदाचार्यमीडे ।।

4. कलानां प्रचारं दधानं विनम्रं स्वयं ग्रन्थकारं सतां मानितारम् ।
नमत्तापहारं स्वयं निर्विकारं दयानन्दरूपं मदाचार्यमीडे ।।

5. सदा शान्तिमूर्तिं सदा क्षान्तिमूर्तिं सदा दान्तिमूर्तिं सदा सत्यमूर्तिम् ।
प्रमाणप्रवृत्तिं दिशन्तं सुकीर्तिं दयानन्दरूपं मदाचार्यमीडे ।।

6. इदम्पञ्चकं यः पठेच्छुद्धचित्तः सदा मोक्षमार्गे नितान्तं प्रवृत्तः ।
प्रसादात् स शास्तुर्भवेज्ज्ञानयुक्तः स जीवन्मृतो वा भवेन्नित्यमुक्तः ।।

* * *

।। श्रीरामायणवन्दनम् ।।

1. वेदवेद्ये परे पुंसि जाते दशरथात्मजे ।
वेदःप्राचेतसादासीत्साक्षाद्रामायणात्मना ।।

2. वाल्मीकिगिरिसम्भूता रामसागरगामिनी ।
पुनाति भुवनं पुण्या रामायणमहानदी ।।

3. चरितं रघुनाथस्य शतकोटिप्रविस्तरम् ।
एकैकमक्षरं पुंसां महापातकनाशनम् ।।

* * *

।। श्रीरामस्तोत्रम् ।।

1. आपदामपहर्तारं दातारं सर्वसंपदाम् ।
   लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् ।।

2. आर्तानामार्तिहन्तारं भीतानां भीतिनाशनम् ।
   द्विषतां कालदण्डं तं रामचन्द्रं नमाम्यहम् ।।

3. सन्नद्धःकवची खड्गी चापबाणधरो युवा ।
   गच्छन्ममाग्रतो नित्यं रामःपातु सलक्ष्मणः ।।

4. नमःकोदण्डहस्ताय सन्धीकृतशराय च ।
   खण्डिताखिलदैत्याय रामायापन्निवारिणे ।।

5. रामाय रामभद्राय रामचन्द्राय वेधसे ।
   रघुनाथाय नाथाय सीतायाःपतये नमः ।।

6. अग्रतःपृष्ठतश्चैव पार्श्वतश्च महाबलौ ।
   आकर्णपूर्णधन्वानौ रक्षेतां रामलक्ष्मणौ ।।

* * *

।। श्रीसीतारामयोर्ध्यानं वन्दनं च ।।

1. वैदेहीसहितं सुरद्रुमतले हैमे महामण्डपे
   मध्ये पुष्पकमासने मणिमये वीरासने सुस्थितम् ।
   अग्रे वाचयति प्रभञ्जनसुते तत्वं मुनिभ्यःपरं
   व्याख्यान्तं भरतादिभिःपरिवृतं रामं भजे श्यामलम् ।।

2. वामे भूमिसुता पुरश्चहनुमान्पश्चात्सुमित्रासुतः
   शत्रुघ्नोभरतश्चपार्श्वदलयोर्वाय्वादिकोणेषु च ।
   सुग्रीवश्चविभीषणश्च युवराट् तारासुतो जाम्बवान्
   मध्ये नीलसरोजकोमलरुचिं रामं भजे श्यामलम् ।।

3. नमोऽस्तुरामाय सलक्ष्मणाय देव्यै च तस्यै जनकात्मजायै ।
   नमोऽस्तुरुद्रेन्द्रयमानिलेभ्यो नमोऽस्तु चन्द्रार्कमरुद्गणेभ्यः ।।

* * *

।। श्रीहनुमत्पञ्चरत्नम् ।।

1. वीताखिलविषयेच्छं जातानन्दाश्रुपुलकमत्यच्छम् ।
   सीतापतिदूताद्यं वातात्मजमद्य भावये हृद्यम् ।।

2. तरुणारुणमुखकमलं करुणारसपूरपूरितापाङ्गम् ।
   सञ्जीवनमाशासे मञ्जुलमहिमानमञ्जनाभाग्यम् ।।

3. शम्बरवैरिशरातिगमम्बुजदलविपुललोचनोदारम् ।
कम्बुगलमनिलदिष्टं बिम्बज्वलितोष्ठमेकमवलम्बे ।।

4. दूरीकृतसीतार्तिःप्रकटीकृतरामवैभवस्फूर्तिः ।
दारितदशमुखकीर्तिःपुरतो मम भातु हनुमतो मूर्तिः ।।

5. वानरनिकराध्यक्षं दानवकुलकुमुदरविकरसदृशम् ।
दीनजनावनदीक्षं पवनतपःपाकपुञ्जमद्राक्षम् ।।

6. एतत्पवनसुतस्य स्तोत्रं यःपठति पञ्चरत्नाख्यम् ।
चिरमिहनिखिलान्भोगान्भुक्त्वाश्रीरामभक्तिभाग्भवति ।।

* * *

।। श्रीहनुमन्नमस्कारः ।।

1. गोष्पदीकृतवाराशिं मशकीकृतराक्षसम् ।
रामायणमहामालारत्नं वन्देऽनिलात्मजम् ।।

2. अञ्जनानन्दनं वीरं जानकीशोकनाशनम् ।
कपीशमक्षहन्तारं वन्दे लङ्काभयङ्करम् ।।

3. महाव्याकरणाम्भोधिमन्थमानसमन्दरम् ।
कवयन्तं रामकीर्त्या हनुमन्तमुपास्महे ।।

4. उल्लङ्घ्य सिन्धोःसलिलं सलीलं यःशोकवह्निं जनकात्मजायाः ।
आदाय तेनैव ददाह लङ्कां नमामि तं प्राञ्जलिराञ्जनेयम् ।।

5. मनोजवं मारुततुल्यवेगं जितेन्द्रियं बुद्धिमतां वरिष्ठम् ।
वातात्मजं वानरयूथमुख्यं श्रीरामदूतं शिरसा नमामि ।।

6. आञ्जनेयमतिपाटलाननं काञ्चनाद्रिकमनीयविग्रहम् ।
पारिजाततरुमूलवासिनं भावयामि पवमाननन्दनम् ।।

7. यत्र यत्र रघुनाथकीर्तनं तत्र तत्र कृतमस्तकाञ्जलिम् ।
बाष्पवारिपरिपूर्णलोचनं मारुतिं नमत राक्षसान्तकम् ।।

* * *

।। दशावतारस्तोत्रम् ।।

1. राम हरे कृष्ण हरे तव नाम वदामि सदा नृहरे ।
नामस्मरणादन्योपायं नहि पश्यामो भवतरणे ।।

2. वेदोद्धारविचारमते सोमकदानवसंहरणे ।
मीनाकारशरीरनमो हरभक्तं ते परिपालय माम् ।।

3. मंथानाचलधारणहेतो देवासुर परिपालन भो ।
कूर्माकारशरीरनमो हरभक्तं ते परिपालय माम् ।।

4. भूचोरकहर पुण्यदमूर्ते क्रोढोद्धृतभूदेशहरे ।
क्रोढाकारशरीरनमो हरभक्तं ते परिपालय माम् ।।

5. हेमकशिपु तनुधारणहेतो प्रह्लादासुरपालन भो ।
नरसिंहाच्युतरूपनमो हरभक्तं ते परिपालय माम् ।।

6. बलिमदभंजन विततमते पादोद्वयकृतलोककृते ।
पटुवटुवेषमनोज्ञनमो हरभक्तं ते परिपालय माम् ।।

7. क्षितिपतिवंशसंभवमूर्ते क्षितिपतिरक्षाक्षतमूर्ते ।
भृगुपतिरामवरेण्यनमो हरभक्तं ते परिपालय माम् ।।

8. सीतावल्लभदाशरथे दशरथनंदन लोकगुरो ।
रावणमर्दनरामनमो हरभक्तं ते परिपालय माम् ।।

9. कृष्णानंदकृपाजलधे कंसारे कमलेशहरे ।
कालियमर्दनकृष्णनमो हरभक्तं ते परिपालय माम् ।।

10. त्रिपुरसतीमानविहरणा त्रिपुरविजयमार्गणरूपा ।
शुद्धज्ञानविबुद्धनमो हरभक्तं ते परिपालय माम् ।।

11. दुष्टविमर्दनशिष्टहरे कलितुरगोत्तमवाहन रे ।
कल्किन्करकरवालनमो हरभक्तं ते परिपालय माम् ।।

* * *

।। गीताध्यानम् ।।

1. ॐपार्थाय प्रतिबोधितां भगवता नारायणेन स्वयं
   व्यासेन ग्रथितां पुराणमुनिना मध्ये महाभारतम् ।
   अद्वैतामृतवर्षिणीं भगवतीमष्टादशाध्यायिनीं
   अम्ब त्वामनुसन्दधामि भगवद्गीते भवद्वेषिणीम् ।।

2. नमोऽस्तु ते व्यास विशालबुद्धे फुल्लारविन्दायतपत्रनेत्र ।
   येन त्वया भारततैलपूर्णःप्रज्वालितो ज्ञानमयःप्रदीपः ।।

3. प्रपन्नपारिजाताय तोत्रवेत्रैकपाणये ।
   ज्ञानमुद्राय कृष्णाय गीतामृतदुहे नमः ।।

4. सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः ।
   पार्थो वत्सःसुधीर्भोक्ता दुग्धं गीतामृतं महत् ।।

5. वसुदेवसुतं देवं कंसचाणूरमर्दनम् ।
   देवकीपरमानन्दं कृष्णं वन्दे जगद्गुरुम् ।।

6. भीष्मद्रोणतटा जयद्रथजला गान्धारनीलोत्पला
   शल्यग्राहवती कृपेण वहनी कर्णेन वेलाकुला ।
   अश्वत्थामविकर्णघोरमकरा दुर्योधनावर्तिनी
   सोत्तीर्णा खलु पाण्डवै रणनदी कैवर्तकःकेशवः ।।

7. पाराशर्यवचःसरोजममलं गीतार्थगन्धोत्कटं
नानाख्यानककेसरं हरिकथासम्बोधनाबोधितम् ।
लोके सज्जनषट्पदैरहरहःपेपीयमानं मुदा
भूयाद्भारतपङ्कजं कलिमलप्रध्वंसि नःश्रेयसे ।।

8. मूकं करोति वाचालं पङ्गुं लङ्घयते गिरिम् ।
यत्कृपा तमहं वन्दे परमानन्दमाधवम् ।।

9. यं ब्रह्मावरुणेन्द्ररुद्रमरुतःस्तुन्वन्ति दिव्यैःस्तवैः
वेदैःसाङ्गपदक्रमोपनिषदैर्गायन्ति यं सामगाः ।
ध्यानावस्थिततद्गतेन मनसा पश्यन्ति यं योगिनो
यस्यान्तं न विदुःसुरासुरगणाःदेवाय तस्मै नमः ।।

* * *

।। गीतामाहात्म्यम् ।।

1. गीताशास्त्रमिदं पुण्यं यःपठेत्प्रयतःपुमान् ।
विष्णोःपदमवाप्नोति भयशोकादिवर्जितः ।।

2. गीताध्ययनशीलस्य प्राणायामपरस्य च ।
नैव सन्ति हि पापानि पूर्वजन्मकृतानि च ।।

3. मलनिर्मोचनं पुंसां जलस्नानं दिने दिने ।
सकृद्गीताम्भसि स्नानं संसारमलनाशनम् ।।

4. गीता सुगीता कर्तव्या किमन्यैःशास्त्रविस्तरैः ।
या स्वयं पद्मनाभस्य मुखपद्माद्विनिःसृता ।।

5. भारतामृतसर्वस्वं विष्णोर्वक्त्राद्विनिःसृतम् ।
गीतागङ्गोदकं पीत्वा पुनर्जन्म न विद्यते ।।

6. सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः ।
पार्थो वत्सःसुधीर्भोक्ता दुग्धं गीतामृतं महत् ।।

7. एकं शास्त्रं देवकीपुत्रगीतमेको देवो देवकीपुत्र एव ।
एको मन्त्रस्तस्य नामानि यानि कर्माप्येकं तस्य देवस्य सेवा ।।

धरोवाच

8. भगवन् परेमेशान भक्तिरव्यभिचारिणी ।
प्रारब्धं भुज्यमानस्य कथं भवति हे प्रभो ।।

श्रीविष्णुरुवाच

9. प्रारब्धं भुज्यमानो हि गीताभ्यासरतःसदा ।
स मुक्तःस सुखी लोके कर्मणा नोपलिप्यते ।।

10. महापापादिपापानि गीताध्यानं करोति चेत् ।
क्वचित्स्पर्शं न कुर्वन्ति नलिनीदलमम्बुवत् ।।

11. गीतायाःपुस्तकं यत्र यत्र पाठःप्रवर्तते ।
तत्र सर्वाणि तीर्थानि प्रयागादीनि तत्र वै ।।

12. सर्वे देवाश्च ऋषयो योगिनःपन्नगाश्च ये ।
गोपाला गोपिका वापि नारदोद्धवपार्षदैः ।।

13. सहायो जायते शीघ्रं यत्र गीता प्रवर्तते
यत्र गीताविचारश्च पठनं पाठनं श्रुतम् ।
तत्राहं निश्चितं पृथ्वि निवसामि सदैव हि ।।

14. गीताश्रयेऽहं तिष्ठामि गीता मे चोत्तमं गृहम् ।
गीताज्ञानमुपाश्रित्य त्रीन्लोकान्पालयाम्यहम् ।।

15. गीता मे परमा विद्या ब्रह्मरूपा न संशयः ।
अर्धमात्राक्षरा नित्या स्वानिर्वाच्यपदात्मिका ।।

16. चिदानन्देन कृष्णेन प्रोक्ता स्वमुखतोऽर्जुनम् ।
वेदत्रयी परानन्दा तत्त्वार्थज्ञानसंयुता ।।

17. योऽष्टादशजपो नित्यं नरो निश्चलमानसः ।
ज्ञानसिद्धिं स लभते ततो याति परं पदम् ।।

18. पाठेऽसमऽग्रेसम्पूर्णेततोऽर्धंपाठमाचरेत् ।
तदा गोदानजं पुण्यं लभते नात्र संशयः ।।

19. त्रिभागं पठमानस्तु गङ्गास्नानफलं लभेत् ।
षडंशं जपमानस्तु सोमयागफलं लभेत् ।।

20. एकाध्यायं तु यो नित्यं पठते भक्तिसंयुतः ।
रुद्रलोकमवाप्नोति गणो भूत्वा वसेच्चिरम् ।।

21. अध्यायं श्लोकपादं वा नित्यं यःपठते नरः ।
स याति नरतां यावन्मन्वन्तरं वसुन्धरे ।।

22. गीतायाःश्लोकदशकं सप्तपञ्चचतुष्टयम् ।
द्वौ त्रीनेकं तदर्धं वा श्लोकानां यःपठेन्नरः ।।

23. चन्द्रलोकमवाप्नोति वर्षाणामयुतं ध्रुवम् ।
गीतापाठसमायुक्तो मृतो मानुषतां व्रजेत् ।।

24. गीताभ्यासं पुनःकृत्वा लभते मुक्तिमुत्तमाम् ।
गीतेत्युच्चारसंयुक्तो म्रियमाणो गतिं लभेत् ।।

25. गीतार्थश्रवणासक्तो महापापयुतोऽपि वा ।
वैकुण्ठं समवाप्नोति विष्णुना सह मोदते ।।

26. गीतार्थं ध्यायते नित्यं कृत्वा कर्माणि भूरिशः ।
जीवन्मुक्तःस विज्ञेयो देहान्ते परमं पदम् ।।

27. गीतामाश्रित्य बहवो भूभुजो जनकादयः ।
निर्धूतकल्मषा लोके गीता याताःपरं पदम् ।।

28. गीतायाःपठनं कृत्वा माहात्म्यं नैव यःपठेत् ।
वृथा पाठो भवेत्तस्य श्रम एव ह्युदाहृतः ।।

29. एतन्माहात्म्यसंयुक्तं गीताभ्यासं करोति यः ।
स तत्फलमवाप्नोति दुर्लभां गतिमाप्नुयात् ।।

सूत उवाच

30. माहात्म्यमेतद्गीताया मया प्रोक्तं सनातनम् ।
गीतान्ते च पठेद्यस्तु यदुक्तं तत्फलं लभेत् ।।

* * *

।। बालमुकुन्दाष्टकम् ।।

1. करारविन्देन पदारविन्दं मुखारविन्दे विनिवेशयन्तम् ।
वटस्यपत्रस्य पुटे शयानं बालं मुकुन्दं मनसा स्मरामि ।।

2. संहृत्य लोकान्वटपत्रमध्ये शयानमाद्यन्तविहीनरूपम् ।
सर्वेश्वरं सर्वहितावतारं बालं मुकुन्दं मनसा स्मरामि ।।

3. इन्दीवरश्यामलकोमलाङ्गं इन्द्रादिदेवार्चितपादपद्मम् ।
सन्तानकल्पद्रुममाश्रितानां बालं मुकुन्दं मनसा स्मरामि ।।

4. लम्बालकं लम्बितहारयष्टिं शृङ्गारलीलाङ्कितदन्तपङ्क्तिम् ।
बिंबाधरं चारुविशालनेत्रं बालं मुकुन्दं मनसा स्मरामि ।।

5. शिक्ये निधायाद्यपयोदधीनि बहिर्गतायां व्रजनायिकायाम् ।
भुक्त्वा यथेष्टं कपटेन सुप्तं बालं मुकुन्दं मनसा स्मरामि ।।

6. कलिन्दजान्तस्थितकालियस्य फणाग्ररङ्गे नटनप्रियन्तम् ।
तत्पुच्छहस्तं शरदिन्दुवक्त्रं बालं मुकुन्दं मनसा स्मरामि ।।

7. उलूखले बद्धमुदारशौर्यं उत्तुङ्गयुग्मार्जुनभङ्गलीलम् ।
उत्फुल्लपद्मायतचारुनेत्रं बालं मुकुन्दं मनसा स्मरामि ।।

8. आलोक्य मातुर्मुखमादरेण स्तन्यं पिबन्तं सरसीरुहाक्षम् ।
सच्चिन्मयं देवमनन्तरूपं बालं मुकुन्दं मनसा स्मरामि ।।

* * *

।। श्री कृष्णाष्टकम् ।।

1. वसुदेवसुतं देवं कंसचाणूरमर्दनम् ।
देवकीपरमानन्दं कृष्णं वन्दे जगद्गुरुम् ।।

2. अतसीपुष्पसंकाशं हारनूपुरशोभितम् ।
रत्नकङ्कणकेयूरं कृष्णं वन्दे जगद्गुरुम् ।।

3. कुटिलालकसंयुक्तं पूर्णचन्द्रनिभाननम् ।
विलसत्कुण्डलधरं कृष्णं वन्दे जगद्गुरुम् ।।

4. मन्दारगन्धसंयुक्तं चारुहासं चतुर्भुजम् ।
बर्हिपिञ्छावचूडाङ्गं कृष्णं वन्दे जगद्गुरुम् ।।

5. उत्फुल्लपद्मपत्राक्षं नीलजीमूतसन्निभम् ।
यादवानां शिरोरत्नं कृष्णं वन्दे जगद्गुरुम् ।।

6. रुक्मिणीकेलिसंयुक्तं पीतांबरसुशोभितम् ।
अवाप्ततुलसीगन्धं कृष्णं वन्दे जगद्गुरुम् ।।

7. गोपिकानां कुचद्वन्द्वं कुंकुमाङ्कितवक्षसम् ।
श्रीनिकेतं महेष्वासं कृष्णं वन्दे जगद्गुरुम् ।।

8. श्रीवत्साङ्कं महोरस्कं वनमालाविराजितम् ।
शङ्खचक्रधरं देवं कृष्णं वन्दे जगद्गुरुम् ।।

9. कृष्णाष्टकमिदं पुण्यं प्रातरुत्थाय यःपठेत् ।
कोटिजन्मकृतं पापं स्मरणेन विनश्यति ।।

* * *

।। मधुराष्टकम् ।।

1. अधरं मधुरं वदनं मधुरं नयनं मधुरं हसितं मधुरम् ।
हृदयं मधुरं गमनं मधुरं मधुराधिपतेरखिलं मधुरम् ।।

2. वचनं मधुरं चरितं मधुरं वसनं मधुरं वलितं मधुरम् ।
चलितं मधुरं भ्रमितं मधुरं मधुराधिपतेरखिलं मधुरम् ।।

3. वेणुर्मधुरो रेणुर्मधुरः पाणिर्मधुरःपादौमधुरौ ।
नृत्यं मधुरं सख्यं मधुरं मधुराधिपतेरखिलं मधुरम् ।।

4. गीतं मधुरं पीतं मधुरं भुक्तं मधुरं सुप्तं मधुरम् ।
रूपं मधुरं तिलकं मधुरं मधुराधिपतेरखिलं मधुरम् ।।

5. करणं मधुरं तरणं मधुरं हरणं मधुरं रमणं मधुरम् ।
वमितं मधुरं शमितं मधुरं मधुराधिपतेरखिलं मधुरम् ।।

6. गुञ्जा मधुरा माला मधुरा यमुना मधुरा वीची मधुरा ।
सलिलं मधुरं कमलं मधुरं मधुराधिपतेरखिलं मधुरम् ।।

7. गोपी मधुरा लीला मधुरा युक्तं मधुरं भुक्तं मधुरम् ।
दृष्टं मधुरं शिष्टं मधुरं मधुराधिपतेरखिलं मधुरम् ।।

8. गोपा मधुरा गावो मधुरा यष्टिर्मधुरा सृष्टिर्मधुरा ।
दलितं मधुरं फलितं मधुरं मधुराधिपतेरखिलं मधुरम् ।।

* * *

।। अच्युताष्टकम् ।।

1. अच्युतं केशवं रामनारायणं, कृष्णदामोदरं वासुदेवं हरिम् ।
श्रीधरं माधवं गोपिकावल्लभं, जानकीनायकं रामचन्द्रं भजे ।।

2. अच्युतं केशवं सत्यभामाधवं, माधवं श्रीधरं राधिकाराधितम् ।
इन्दिरामन्दिरं चेतसासुन्दरं, देवकीनन्दनं नन्दनं सन्दधे ।।

3. विष्णवे जिष्णवे शङ्खिने चक्रिणे, रुक्मिणीरागिणे जानकीजानये ।
वल्लवीवल्लभायाऽर्चितायात्मने, कंसविध्वंसिने वंशिने ते नमः ।।

4. कृष्ण गोविन्द हे राम नारायण, श्रीपते वासुदेवाजित श्रीनिधे ।
अच्युतानन्द हे माधवाधोक्षज, द्वारकानायकद्रौपदीरक्षक ।।

5. राक्षसक्षोभितःसीतया शोभितो दण्डकारण्यभूपुण्यताकारणः ।
लक्ष्मणेनान्वितो वानरैःसेवितो अगस्त्यसम्पूजितो राघवःपातु माम् ।।

6. धेनुकारिष्टकोऽनिष्टकृद्वेषिणां, केशिहाकंसहृद्वंशिकावादकः ।
पूतनाकोपकःसूरजाखेलनो, बालगोपालकःपातु मां सर्वदा ।।

7. विद्युदुद्योतवत्प्रस्फुरद्वाससं, प्रावृडम्भोदवत्प्रोल्लसद्विग्रहम् ।
वन्यया मालया शोभितोरःस्थलं, लोहिताङ्घ्रिद्वयं वारिजाक्षं भजे ।।

8. कुञ्चितैःकुन्तलैर्भ्राजमाननं, रत्नमौलिलसत्कुण्डलं गण्डयोः ।
हारकेयूरकं कङ्कणप्रोज्ज्वलं, किङ्किणीमञ्जुलं श्यामलं तं भजे ।।

9. अच्युतस्याष्टकं यःपठेदिष्टदं प्रेमतःप्रत्यहं पूरुषःसस्पृहम् ।
वृत्ततःसुन्दरं कर्तृविश्वम्भरं तस्य वश्यो हरिर्जायते सत्वरम् ।।

* * *

।। शिव पञ्चाक्षरस्तोत्रम् ।।

1. ॐनमः शिवाय शिवाय नम ओम् ।
   ॐनमः शिवाय शिवाय नम ओम् ।।

2. नागेन्द्रहाराय त्रिलोचनाय भस्माङ्गरागाय महेश्वराय ।
   नित्याय शुद्धाय दिगम्बराय तस्मै नकाराय नमः शिवाय ।।
   ॐनमःशिवाय .....

3. मन्दाकिनीसलिलचन्दनचर्चिताय नन्दीश्वरप्रमथनाथमहेश्वराय ।
   मन्दारपुष्पबहुपुष्पसुपूजिताय तस्मै मकाराय नमःशिवाय ।।
   ॐनमःशिवाय .....

4. शिवाय गौरीवदनाब्जवृन्द सूर्याय दक्षाध्वरनाशकाय ।
   श्रीनीलकण्ठाय वृषध्वजाय तस्मै शिकाराय नमःशिवाय ।।
   ॐनमःशिवाय .....

5. वसिष्ठकुम्भोद्भवगौतमार्य मुनीन्द्रदेवार्चितशेखराय ।
   चन्द्रार्कवैश्वानरलोचनाय तस्मै वकाराय नमःशिवाय ।।
   ॐनमःशिवाय .....

6. यक्षस्वरूपाय जटाधराय पिनाकहस्ताय सनातनाय ।
   दिव्याय देवाय दिगम्बराय तस्मै यकाराय नमःशिवाय ।।
   ॐनमःशिवाय .....

7. पञ्चाक्षरमिदं पुण्यं यःपठेच्छिवसन्निधौ ।
शिवलोकमवाप्नोति शिवेन सह मोदते ।।

* * *

।। लिङ्गाष्टकम् ।।

1. ब्रह्ममुरारिसुरार्चितलिङ्गं निर्मलभासितशोभितलिङ्गम् ।
जन्मजदुःखविनाशकलिङ्गं तत्प्रणमामि सदाशिवलिङ्गम् ।।

2. देवमुनिप्रवरार्चितलिङ्गं कामदहं करुणाकरलिङ्गम् ।
रावणदर्पविनाशनलिङ्गं तत्प्रणमामि सदाशिवलिङ्गम् ।।

3. सर्वसुगन्धिसुलेपितलिङ्गं बुद्धिविवर्धनकारणलिङ्गम् ।
सिद्धसुरासुरवन्दितलिङ्गं तत्प्रणमामि सदाशिवलिङ्गम् ।।

4. कनकमहामणिभूषितलिङ्गं फणिपतिवेष्टितशोभितलिङ्गम् ।
दक्षसुयज्ञविनाशनलिङ्गं तत्प्रणमामि सदाशिवलिङ्गम् ।।

5. कुङ्कुमचन्दनलेपितलिङ्गं पङ्कजहारसुशोभितलिङ्गम् ।
सञ्चितपापविनाशनलिङ्गं तत्प्रणमामि सदाशिवलिङ्गम् ।।

6. देवगणार्चितसेवितलिङ्गं भावैर्भक्तिभिरेव च लिङ्गम् ।
दिनकरकोटिप्रभाकरलिङ्गं तत्प्रणमामि सदाशिवलिङ्गम् ।।

7. अष्टदलोपरिवेष्टितलिङ्गं सर्वसमुद्भवकारणलिङ्गम् ।
अष्टदरिद्रविनाशनलिङ्गं तत्प्रणमामि सदाशिवलिङ्गम् ।।

8. सुरगुरुसुरवरपूजितलिङ्गं सुरवनपुष्पसदार्चितलिङ्गम् ।
परात्परंपरमात्मकलिङ्गं तत्प्रणमामि सदाशिवलिङ्गम् ।।

लिङ्गाष्टकमिदं पुण्यं यःपठेत्शिवसन्निधौ ।
शिवलोकमवाप्नोति शिवेन सह मोदते ।।

* * *

।। श्री मार्गबन्धुस्तोत्रम् ।।

धु

1. शम्भो महादेव देव, शिव शम्भो महादेव ।
देवेश शम्भो, शम्भो महादेव देव ।।

2. फालावनम्रत्किरीटं फालनेत्रार्चिषा दग्धपञ्चेषुकीटम् ।
शूलाहतारातिकूटं शुद्धमर्धेन्दुचूडं भजे मार्गबन्धुम् ।। शम्भो ।।

3. अङ्गे विराजद्भुजङ्गं अभ्रगङ्गातरङ्गाभिरामोत्तमाङ्गम् ।
ओङ्कारवाटीकुरङ्गं सिद्धसंसेवितांघ्रिं भजे मार्गबन्धुम् ।। शम्भो ।।

4. नित्यं चिदानन्दरूपं निह्रुताशेषलोकेशवैरिप्रतापम् ।
कार्तस्वरागेन्द्रचापं कृत्तिवासं भजे दिव्यसन्मार्गबन्धुम् ।। शम्भो ।।

5. कन्दर्पदर्पघ्नमीशं कालकण्ठं महेशं महाव्योमकेशम् ।
कुन्दाभदन्तं सुरेशं कोटिसूर्यप्रकाशं भजे मार्गबन्धुम् ।। शम्भो ।।

6. मन्दारभूतेरुदारं मन्थरागेन्द्रसारं महागौर्यदूरम् ।
सिन्दूरदूरप्रचारं सिन्धुराजातिधीरं भजे मार्गबन्धुम् ।।शम्भो ।।

7. अप्पय्ययज्वेन्द्रगीतं स्तोत्रराजं पठेद्यस्तु भक्त्या प्रयाणे।
तस्यार्थसिद्धिं प्रदत्ते मार्गमध्येऽभयं चाशुतोषो महेशः ।। शम्भो ।।

* * *

।। काशीविश्वनाथ स्तोत्रम् ।।

1. गङ्गातरङ्गरमणीयजटाकलापं गौरीनिरन्तरविभूषितवामभागम् ।
नारायणप्रियमनङ्गमदापहारं वाराणसीपुरपतिं भज विश्वनाथम् ।।

2. वाचामगोचरमनेकगुणस्वरूपं वागीशविष्णुसुरसेवितपादपीठम् ।
वामेन विग्रहवरेण कलत्रवन्तं वाराणसीपुरपतिं भज विश्वनाथम् ।।

3. भूताधिपं भुजगभूषणभूषिताङ्गं व्याघ्राजिनाम्बरधरं जटिलं त्रिनेत्रम् ।
पाशाङ्कुशाभयवरप्रदशूलपाणिं वाराणसीपुरपतिं भज विश्वनाथम् ।

4. शीतांशुशोभितकिरीटविराजमानं भालेक्षणानलविशोषितपञ्चबाणम् ।
नागाधिपारचितभासुरकर्णपूरं वाराणसीपुरपतिं भज विश्वनाथम् ।।

5. पञ्चाननं दुरितमत्तमतङ्गजानां नागान्तकं दनुजपुङ्गवपन्नगानाम् ।
दावानलं मरणशोकजराटवीनां वाराणसीपुरपतिं भज विश्वनाथम् ।।

6. तेजोमयं सगुणनिर्गुणमद्वितीयं
आनन्दकन्दमपराजितमप्रमेयम् ।
नागात्मकं सकलनिष्कलमात्मरूपं
वाराणसीपुरपतिं भज विश्वनाथम् ।।

7. आशां विहाय परिहृत्य परस्य निन्दां
पापे रतिं च सुनिवार्य मनःसमाधौ ।
आदाय हृत्कमलमध्यगतं परेशं
वाराणसीपुरपतिं भज विश्वनाथम् ।।

8. रागादिदोषरहितं स्वजनानुरागं वैराग्यशान्तिनिलयं गिरिजासहायम् ।
माधुर्यधैर्यसुभगं गरलाभिरामं वाराणसीपुरपतिं भज विश्वनाथम् ।।

9. वाराणसीपुरपतेःस्तवनं शिवस्य
व्याख्यातमष्टकमिदं पठते मनुष्यः ।
विद्यां श्रियं विपुलसौख्यमनन्तकीर्तिं
सम्प्राप्य देहविलये लभते च मोक्षम् ।।

* * *

।। पतञ्जलिकृत नटराज स्तोत्रम् ।।

1. सदश्चितमुदश्चितनिकुञ्चितपदं झलझलञ्चलितमञ्जुकटकम्
पतञ्जलि दृगञ्जनमनञ्जनमचञ्चलपदं जननभञ्जनकरम् ।
कदम्बरुचिमम्बरवसं परममम्बुद कदम्बकविडम्बकगलम्
चिदम्बुधिमणिं बुध हृदम्बुज रविं पर चिदम्बरनटं हृदि भज ।।

2. हरं त्रिपुरभञ्जनं अनन्तकृतकङ्कणं अखण्डदयमन्तरहितं
विरिञ्चिसुरसंहतिपुरन्दर विचिन्तितपदं तरुणचन्द्रमुकुटम् ।
परं पद विखण्डितयमं भसित मण्डिततनुं मदनवञ्चन परं
चिरन्तनममुं प्रणतसञ्चितनिधिं पर चिदम्बर नटं हृदि भज ।।

3. अवन्तमखिलं जगदभङ्गगुणतुङ्गममतं धृतविधुं सुरसरित्-
तरङ्गनिकुरम्ब धृतिलम्पटजटं शमनडम्बसु हरं भवहरम् ।
शिवं दशदिगन्तर विजृम्भितकरं करलसन्मृगशिशुं पशुपतिं
हरं शशिधनञ्जयपतङ्गनयनं पर चिदम्बर नटं हृदि भज ।।

4. अनन्तनवरत्नविलसत्कटककिङ्किणिझलंझल झलंझलरवं
मुकुन्दविधि हस्तगतमद्दल लयध्वनिधिमिद्धिमित नर्तन पदम् ।
शकुन्तरथ बर्हिरथ नन्दिमुख दन्तिमुखभृङ्गिरिटिसङ्घनिकटम्
सनन्दसनकप्रमुख वन्दितपदं पर चिदम्बर नटं हृदि भज ।।

5. अनन्तमहिमं त्रिदशवन्द्यचरणं मुनिहृदन्तर वसन्तममलम्
कबन्ध वियदिन्द्ववनि गन्धवह वह्निमखबन्धुरविमञ्जुवपुषम् ।
अनन्तविभवं त्रिजगदन्तरमणिं त्रिनयनं त्रिपुरखण्डन परम्
सनन्दमुनिवन्दितपदं सकरुणं पर चिदम्बर नटं हृदि भज ।।

6. अचिन्त्यमलिवृन्द रुचिबन्धुरगलं स्फुरित कुन्द निकुरुम्ब धवलम्
मुकुन्द सुरवृन्द बलहन्तृ कृतवन्दन लसन्तमहिकुण्डल धरम् ।
अकम्पमनुकम्पित रविं सुजन मङ्गलनिधिं गजहरं पशुपतिम्
धनञ्जयनुतं प्रणत रञ्जनपरं पर चिदम्बर नटं हृदि भज ।।

7. परं सुरवरं पुरहरं पशुपतिं जनित दन्तिमुख षण्मुखममुं
मृडं कनक पिङ्गल जटं सनकपङ्कज रविं सुमनसं हिमरुचिम् ।
असङ्गमनसं जलधि जन्मगरलं कवलयन्तमतुलं गुणनिधिम्
सनन्दवरदं शमितमिन्दुवदनं पर चिदम्बर नटं हृदि भज ।।

8. अजं क्षितिरथं भुजगपुङ्गवगुणं कनक शृङ्गि धनुषं करलसत्
कुरङ्ग पृथु टङ्क परशुं रुचिरकुङ्कुम रुचिं डमरुकं च दधतम् ।
मुकुन्द विशिखं नमदवन्ध्य फलदं निगमबृन्द तुरगं निरुपमं
सचण्डिकममुं झटिति संहृतपुरं परचिदम्बर नटं हृदि भज ।।

9. अनङ्गपरिपन्थिनमजं क्षिति धुरन्धरमलं करुणयन्तमखिलं
ज्वलन्तमनलं दधतमन्तकरिपुं सततमिन्द्रसुरवन्दितपदम् ।
उदञ्चदरविन्दकुल बन्धुशत बिम्बरुचि संहति सुगन्धि वपुषं
पतञ्जलिनुतं प्रणवपञ्जर शुकम्पर चिदम्बर नटं हृदि भज ।।

10. इति स्तवममुं भुजगपुङ्गवकृतं प्रतिदिनं पठति यः कृतमुखः
सदः प्रभुपदद्वितयदर्शनपदं सुललितं चरणशृङ्गरहितम् ।
सरःप्रभव सम्भव हरित्पति हरिप्रमुख दिव्यनुत शङ्करपदं
स गच्छति परं न तु जनुर्जलनिधिं परमदुःखजनकं दुरितदम् ।।

* * *

।। श्री चन्द्रशेखराष्टकम् ।।

संसारसर्पदष्टानां जन्तूनामविवेकिनाम् ।
चन्द्रशेखरपादाब्जस्मरणं परमौषधम् ।।

चन्द्रशेखरचन्द्रशेखरचन्द्रशेखरपाहिमाम् ।
चन्द्रशेखरचन्द्रशेखरचन्द्रशेखर रक्ष माम् ।।

1. रत्नसानुशरासनं रजतादिशृङ्गनिकेतनं
सिञ्जिनीकृतपन्नगेश्वरमच्युतानलसायकम् ।
क्षिप्रदग्धपुरत्रयं त्रिदशालयैरभिवन्दितं
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ।।

2. पञ्चपादपपुष्पगन्धिपदाम्बुजद्वयशोभितं
भाललोचनजातपावकदग्धमन्मथविग्रहम् ।
भस्मदिग्धकलेवरं भवनाशिनं भवमव्ययं
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ।।

3. मत्तवारणमुख्यचर्मकृतोत्तरीयमनोहरं
पङ्कजासनपद्मलोचनपूजिताङ्घ्रिसरोरुहम् ।
देवसिद्धतरङ्गिणीकरसिक्तशीतजटाधरं
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ।।

4. कुण्डलीकृतकुण्डलीश्वरकुण्डलं वृषवाहनं
नारदादिमुनीश्वरस्तुतवैभवं भुवनेश्वरम् ।
अन्धकान्तकामाश्रितामरपादपं शमनान्तकं
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ।।

5. यक्षराजसखं भगाक्षिहरं भुजङ्गविभूषणं
शैलराजसुतापरिष्कृतचारुवामकलेवरम् ।
क्ष्वेडनीलगलं परश्वधधारिणं मृगधारिणं
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ।।

6. भेषजं भवरोगिणामखिलापदामपहारिणं
दक्षयज्ञविनाशिनं त्रिगुणात्मकं त्रिविलोचनम् ।
भुक्तिमुक्तिफलप्रदं निखिलाघसङ्घनिबर्हणं
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ।।

7. भक्तवत्सलमर्चतां निधिमक्षयं हरिदम्बरं
सर्वभूतपतिं परात्परम्प्रमेयमनूपमम् ।
भूमिवारिनभोहुताशनसोमपालितस्वाकृतिं
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ।।

8. विश्वसृष्टिविधायिनं पुनरेवपालनतत्परं
संहरन्तमथ प्रपञ्चमशेषलोकनिवासिनम् ।
क्रीडयन्तमहर्निशं गणनाथयूथसमावृतं
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ।।

9. मृत्युभीतमृकण्डुसूनुकृतस्तवंशिवसन्निधौ
यत्रकुत्रचयःपठेन्नहितस्यमृत्युभयं भवेत् ।
पूर्णमायुररोगतामखिलार्थसम्पदमादरात्
चन्द्रशेखर एव तस्य ददाति मुक्तिमयत्नतः ।।

* * *

।। शिवमानसपूजा ।।

1. रत्नैःकल्पितमासनं हिमजलैःस्नानं च दिव्याम्बरं
नानारत्नविभूषितं मृगमदामोदाङ्कितं चन्दनम् ।
जातीचम्पकबिल्वपत्ररचितं पुष्पं च धूपं तथा
दीपं देव दयानिधे पशुपते हृत्कल्पितं गृह्यताम् ।।

2. सौवर्णे नवरत्नखण्डरचिते पात्रे घृतं पायसं
भक्ष्यं पञ्चविधं पयोदधियुतं रम्भाफलं पानकम् ।
शाकानामयुतं जलं रुचिकरं कर्पूरखण्डोज्ज्वलं
ताम्बूलं मनसा मयाविरचितं भक्त्या प्रभो स्वीकुरु ।।

3. छत्रं चामरयोर्युगं व्यजनकं चादर्शकं निर्मलं
वीणाभेरिमृदङ्गकाहलकलागीतं च नृत्यं तथा ।
साष्टाङ्गं प्रणतिःस्तुतिर्बहुविधाह्येतत्समस्तं मया
सङ्कल्पेन समर्पितं तव विभो पूजां गृहाण प्रभो ।।

4. आत्मा त्वं गिरिजा मतिःसहचराःप्राणाःशरीरं गृहं
पूजा ते विषयोपभोगरचना निद्रा समाधिस्थितिः ।
सञ्चारःपदयोःप्रदक्षिणविधिःस्तोत्राणि सर्वा गिरो
यद्यत्कर्म करोमि तत्तदखिलं शम्भोस्तवाराधनम् ।।

5. करचरणकृतं वाक्कायजं कर्मजं वा
श्रवणनयनजं वा मानसं वाऽपराधम् ।
विहितमविहितं वा सर्वमेतत्क्षमस्व
जय जयकरुणाब्धे श्रीमहादेवशम्भो ।।

* * *

।। कालभैरवाष्टकम् ।।

1. देवराजसेव्यमानपावनांघ्रिपङ्कजं
व्यालयज्ञसूत्रमिन्दुशेखरं कृपाकरम् ।
नारदादियोगिवृन्दवन्दितं दिगंबरं
काशिकापुराधिनाथ कालभैरवं भजे ।।

2. भानुकोटिभास्वरं भवाब्धितारकं परं
नीलकण्ठमीप्सितार्थदायकं त्रिलोचनम् ।
कालकालमंबुजाक्षमस्तशून्यमक्षरं
काशिकापुराधिनाथ कालभैरवं भजे ।।

3. शूलटंकपाशदण्डपाणिमादिकारणं
श्यामकायमादिदेवमक्षरं निरामयम् ।
भीमविक्रमं प्रभुं विचित्रताण्डवप्रियं
काशिकापुराधिनाथ कालभैरवं भजे ।।

4. भुक्तिमुक्तिदायकं प्रशस्तचारुविग्रहं
भक्तवत्सलं स्थिरं समस्तलोकविग्रहम् ।
निक्वणन्मनोज्ञहेमकिङ्किणीलसत्कटिं
काशिकापुराधिनाथ कालभैरवं भजे ।।

5. धर्मसेतुपालकं त्वधर्ममार्गनाशकं
कर्मपाशमोचकं सुशर्मदायकं विभुम् ।
स्वर्णवर्णकेशपाशशोभितांगनिर्मलं
काशिकापुराधिनाथ कालभैरवं भजे ।।

6. रत्नपादुकाप्रभाभिरामपादयुग्मकं
नित्यमद्वितीयमिष्टदैवतं निरंजनम् ।
मृत्युदर्पनाशनं करालदंष्ट्रभूषणं
काशिकापुराधिनाथ कालभैरवं भजे ।।

7. अट्टहासभिन्नपद्मजाण्डकोशसंततिं
दृष्टिपातनष्टपापजालमुग्रशासनम् ।
अष्टसिद्धिदायकं कपालमालिकाधरं
काशिकापुराधिनाथ कालभैरवं भजे ।।

8. भूतसंघनायकं विशालकीर्तिदायकं
काशिवासिलोकपुण्यपापशोधकं विभुम् ।
नीतिमार्गकोविदं पुरातनं जगत्पतिं
काशिकापुराधिनाथ कालभैरवं भजे ।।

9. कालभैरवाष्टकं पठन्ति ये मनोहरं
ज्ञानमुक्तिसाधकं विचित्रपुण्यवर्धनम् ।
शोकमोहलोभदैन्यकोपतापनाशनं
ते प्रयान्ति कालभैरवांघ्रिसन्निधिं ध्रुवम् ।।

* * *

।। श्री कार्तिकेयस्तोत्रम् ।।

1. योगीश्वरो महासेनः कार्तिकेयोऽग्निनन्दनः ।
स्कन्दः कुमारः सेनानीः स्वामी शङ्करसम्भवः ।।

2. गाङ्गेयस्ताम्रचूडश्च ब्रह्मचारी शिखिध्वजः ।
तारकारिरुमापुत्रः क्रौञ्चारिश्च षडाननः ।।

3. शब्दब्रह्म समुद्रश्च सिद्धः सारस्वतो गुहः ।
सनत्कुमारो भगवान्भोगमोक्षफलप्रदः ।।

4. शरजन्मा गणाधीशः पूर्वजो मुक्तिमार्गकृत् ।
सर्वागमप्रणेता च वाञ्छितार्थप्रदर्शनः ।।

5. अष्टाविंशतिनामानि मदीयानीति यः पठेत् ।
प्रत्यूषे श्रद्धया युक्तो मुक्तो वाचस्पतिर्भवेत् ।।

6. महामन्त्रमयानीति मम नामानुकीर्तनम् ।
महाप्रज्ञामवाप्नोति नात्र कार्या विचारणा ।।

* * *

।। शारदास्तोत्रम् ।।

1. नमस्ते शारदे देवि, काश्मीरपुरवासिनि ।
त्वामहं प्रार्थये नित्यं, विद्यादानं च देहि मे ।।

2. या श्रद्धा धारणा मेधा, वाग्देवी विधिवल्लभा ।
भक्तजिह्वाग्रसदना, शमादिगुणदायिनी ।।

3. नमामि यामिनीं नाथ, लेखालङ्कृतकुन्तलाम् ।
भवानीं भवसन्ताप, निर्वापणसुधानदीम् ।।

4. भद्रकाल्यै नमो नित्यं सरस्वत्यै नमो नमः ।
वेदवेदाङ्गवेदान्तविद्यास्थानेभ्य एव च ।।

5. ब्रह्मस्वरूपा परमा ज्योतिरूपा सनातनी ।
सर्वविद्याधिदेवी या तस्यै वाण्यै नमो नमः ।।

6. यया विना जगत्सर्वं शश्वज्जीवन्मृतं भवेत् ।
ज्ञानाधिदेवी या तस्यै सरस्वत्यै नमो नमः ।।

7. यया विना जगत्सर्वं मूकमुन्मत्तवत्सदा ।
या देवी वागधिष्ठात्री तस्यै वाण्यै नमो नमः ।।

* * *

।। कमलजदयिताष्टकम् ।।

1. शृङ्गक्ष्माभृन्निवासे शुकमुखमुनिभिः सेव्यमानाङ्घ्रिपद्मे
स्वाङ्गच्छायाविधूतामृतकरसुरराड्वाहने वाक्सवित्रि ।
शम्भुश्रीनाथमुख्यामरवरनिकरैर्मोदतः पूज्यमाने
विद्यां शुद्धां च बुद्धिं कमलजदयिते सत्वरं देहि मह्यम् ।।

2. कल्यादौ पार्वतीशः प्रवरसुरगणप्रार्थितः श्रौतवर्त्म
प्राबल्यं नेतुकामो यतिवरवपुषागत्य यां शृङ्गशैले ।
संस्थाप्यार्चां प्रचक्रे बहुविधनुतिभिः सा त्वमिन्द्वर्धचूडा
विद्यां शुद्धां च बुद्धिं कमलजदयिते सत्वरं देहि मह्यम् ।।

3. पापौघं ध्वंसयित्वा बहुजनिरचितं किं च पुण्यालिमारात्
सम्पाद्यास्तिक्यबुद्धिं श्रुतिगुरुवचनेष्वादरं भक्तिदाढ्र्यम् ।
देवाचार्यद्विजादिष्वपि मनुनिवहे तावकीने नितान्तं
विद्यां शुद्धां च बुद्धिं कमलजदयिते सत्वरं देहि मह्यम् ।।

4. विद्यामुद्राक्षमालामृतघटविलसत्पाणिपाथोजजाले
विद्यादानप्रवीणे जडबधिरमुखेभ्योऽपि शीघ्रं नतेभ्यः ।
कामादीनान्तरान्मत्सहजरिपुवरान्देवि निर्मूल्य वेगात्
विद्यां शुद्धां च बुद्धिं कमलजदयिते सत्वरं देहि मह्यम् ।।

5. कर्मस्वात्मोचितेषु स्थिरतरधिषणां देहदाढ्र्यं तदर्थं
दीर्घं चायुर्यशश्च त्रिभुवनविदितं पापमार्गाद्विरक्तिम् ।
सत्सङ्गं सत्कथायाः श्रवणमपि सदा देवि दत्वा कृपाब्धे
विद्यां शुद्धां च बुद्धिं कमलजदयिते सत्वरं देहि मह्यम् ।।

6. मातस्त्वत्पादपद्मं न विविधकुसुमैः पूजितं जातु भक्त्या
गातुं नैवाहमीशे जडमतिरलसस्त्वद्गुणान्दिव्यपद्यैः ।
मूके सेवाविहीनेऽप्यनुपमकरुणामर्भकेऽम्बेव कृत्वा
विद्यां शुद्धां च बुद्धिं कमलजदयिते सत्वरं देहि मह्यम् ।।

7. शान्त्याद्याः सम्पदो मे वितर शुभकरीर्नित्यतद्भिन्नबोधं
वैराग्यं मोक्षवाञ्छामपि लघु कलय श्रीशिवासेव्यमाने ।
विद्यातीर्थादियोगिप्रवरकरसरोजातसम्पूजिताङ्घ्रे
विद्यां शुद्धां च बुद्धिं कमलजदयिते सत्वरं देहि मह्यम् ।।

8. सच्चिद्रूपात्मनो मे श्रुतिमननिदिध्यासनान्याशु मातः
सम्पाद्य स्वान्तमेतद्रुचियुतमनिशं निर्विकल्पे समाधौ ।
तुङ्गातीराङ्कराजद्वरगृहविलसच्चक्रराजासनस्थे
विद्यां शुद्धां च बुद्धिं कमलजदयिते सत्वरं देहि मह्यम् ।।

* * *

।। महालक्ष्म्यष्टकम् ।।

1. नमस्तेऽस्तु महामाये श्रीपीठे सुरपूजिते ।
शङ्खचक्रगदाहस्ते महालक्ष्मि नमोऽस्तु ते ।।

2. नमस्ते गरुडारूढे कोलासुरभयङ्करि ।
सर्वपापहरे देवि महालक्ष्मि नमोऽस्तु ते ।।

3. सर्वज्ञे सर्ववरदे सर्वदुष्टभयङ्करि ।
सर्वदुःखहरे देवि महालक्ष्मि नमोऽस्तु ते ।।

4. सिद्धिबुद्धिप्रदे देवि भुक्तिमुक्तिप्रदायिनि ।
मन्त्रमूर्ते सदा देवि महालक्ष्मि नमोऽस्तु ते ।।

5. आद्यन्तरहिते देवि आद्यशक्ति महेश्वरि ।
योगजे योगसम्भूते महालक्ष्मि नमोऽस्तु ते ।।

6. स्थूलसूक्ष्ममहारौद्रे महाशक्ति महोदरे ।
महापापहरे देवि महालक्ष्मि नमोऽस्तु ते ।।

7. पद्मासनस्थिते देवि परब्रह्मस्वरूपिणि ।
परमेशि जगन्मात: महालक्ष्मि नमोऽस्तु ते ।।

8. श्वेताम्बरधरे देवि नानालङ्कारभूषिते ।
जगत्स्थिते जगन्मातर्महालक्ष्मि नमोऽस्तु ते ।।

9. महालक्ष्म्यष्टकस्तोत्रं यः पठेद्भक्तिमान्नरः ।
सर्वसिद्धिमवाप्नोति राज्यं प्राप्नोति सर्वदा ।।

10. एककाले पठेन्नित्यं महापापविनाशनम् ।
द्विकालं यः पठेन्नित्यं धनधान्यसमन्वितः ।।

11. त्रिकालं यः पठेन्नित्यं महाशत्रुविनाशनम् ।
महालक्ष्मीर्भवेन्नित्यं प्रसन्ना वरदा शुभा ।।

* * *

।। श्री कनकधारास्तोत्रम् ।।

1. अङ्गं हरेः पुलकभूषणमाश्रयन्ती
भृङ्गाङ्गनेव मुकुलाभरणं तमालम् ।
अङ्गीकृताखिलविभूतिरपाङ्गलीला
माङ्गल्यदाऽस्तु मम मङ्गलदेवतायाः ।।

2. मुग्धा मुहुर्विदधती वदने मुरारेः
प्रेमत्रपाप्रणिहितानि गतागतानि ।
माला दृशोर्मधुकरीव महोत्पले या
सा मे श्रियं दिशतु सागरसंभवायाः ।।

3. विश्वामरेन्द्रपदविभ्रमदानदक्षं
आनन्दहेतुरधिकं मुरविद्विषोऽपि ।
ईषन्निषीदतु मयि क्षणमीक्षणार्धम्
इन्दीवरोदरसहोदरमिन्दिरायाः ।।

4. आमीलिताक्षमधिगम्य मुदा मुकुन्दं
आनन्दकन्दमनिमेषमनङ्गतन्त्रम् ।
आकेकरस्थितकनीनिकपक्ष्मनेत्रं
भूत्यै भवेन्मम भुजङ्गशयाङ्गनायाः ।।

5. बाह्वन्तरे मधुजितः श्रितकौस्तुभे या
हारावलीव हरिनीलमयी विभाति ।
कामप्रदा भगवतोऽपि कटाक्षमाला
कल्याणमावहतु मे कमलालयायाः ।।

6. कालाम्बुदालिललितोरसि कैटभारेः
धाराधरे स्फुरति या तडिदङ्गनेव ।
मातुस्समस्तजगतां महनीयमूर्तिः
भद्राणि मे दिशतु भार्गवनन्दनायाः ।।

7. प्राप्तं पदं प्रथमतः खलु यत्प्रभावात्
माङ्गल्यभाजि मधुमाथिनि मन्मथेन ।
मय्यापतेत्तदिह मन्थरमीक्षणार्धं
मन्दालसं च मकरालयकन्यकायाः ।।

8. दद्याद्दयानुपवनो द्रविणाम्बुधारां
अस्मिन्नकिञ्चनविहङ्गशिशौ विषण्णे ।
दुष्कर्मधर्ममपनीय चिराय दूरं
नारायणप्रणयिनीनयनाम्बुवाहः ।।

9. इष्टाविशिष्टमतयोऽपि यया दयार्द्र-
दृष्ट्या त्रिविष्टपपदं सुलभं लभन्ते ।
दृष्टिः प्रहृष्टकमलोदरदीप्तिरिष्टां
पुष्टिं कृषीष्ट मम पुष्करविष्टरायाः ।।

10. गीर्देवतेति गरुडध्वजसुन्दरीति
शाकम्भरीति शशिशेखरवल्लभेति ।
सृष्टिस्थितिप्रलयकेलिषु संस्थितायै
तस्यै नमस्त्रिभुवनैकगुरोस्तरुण्यै ।।

11. श्रुत्यै नमोऽस्तु शुभकर्मफलप्रसूत्यै
रत्यै नमोऽस्तु रमणीयगुणार्णवायै ।
शक्त्यै नमोऽस्तु शतपत्रनिकेतनायै
पुष्ट्यै नमोऽस्तु पुरुषोत्तमवल्लभायै ।।

12. नमोऽस्तु नालीकनिभाननायै नमोऽस्तु दुग्धोदधिजन्मभूम्यै ।
नमोऽस्तु सोमामृतसोदरायै नमोऽस्तु नारायणवल्लभायै ।।

13. नमोऽस्तु हेमाम्बुजपीठिकायै नमोऽस्तु भूमण्डलनायिकायै ।
नमोऽस्तु देवादिदयापरायै नमोऽस्तु शार्ङ्गायुधवल्लभायै ।।

14. नमोऽस्तु देव्यै भृगुनन्दनायै नमोऽस्तु विष्णोरुरसि स्थितायै ।
नमोऽस्तु लक्ष्म्यै कमलालयायै नमोऽस्तु दामोदरवल्लभायै ।।

15. नमोऽस्तु कान्त्यै कमलेक्षणायै नमोऽस्तु भूत्यै भुवनप्रसूत्यै ।
नमोऽस्तु देवादिभिरर्चितायै नमोऽस्तु नन्दात्मजवल्लभायै ।।

16. सम्पत्करणि सकलेन्द्रियनन्दनानि साम्राज्यदानविभवानि सरोरुहाणि ।
त्वद्वन्दनानि दुरितहरणोद्यतानि मामेव मातरनिशं कलयन्तु मान्ये ।।

17. सरसिजनयने सरोजहस्ते धवलतरांशुकगन्धमाल्यशोभे ।
भगवति हरिवल्लभे मनोज्ञे त्रिभुवनभूतिकरि प्रसीद मह्यम् ।।

18. यत्कटाक्षसमुपासनाविधिः सेवकस्य सकलार्थसम्पदः ।
संतनोति वचनाङ्गमानसैः त्वां मुरारिहृदयेश्वरीं भजे ।।

19. दिग्धस्तिभिः कनककुंभमुखावसृष्ट-
स्वर्वाहिनीविमलचारुजलाप्लुताङ्गीम्।
प्रातर्नमामि जगतां जननीमशेष-
लोकाधिनाथगृहिणीममृताब्धिपुत्रीम् ।।

20. कमले कमलाक्षवल्लभे त्वं करुणापूरतरङ्गितैरपाङ्गैः ।
अवलोकय मामकिञ्चनानां प्रथमं पात्रमकृत्रिमं दयायाः ।।

21. स्तुवन्ति ये स्तुतिभिरमूभिरन्वहं त्रयीमयीं त्रिभुवनमातरं रमाम् ।
गुणाधिका गुरुतरभाग्यभागिनो भवन्ति ते भुवि बुधभाविताशयाः ।।

* * *

।। श्री महिषासुरमर्दिनी स्तोत्रम् ।।

1. अयि गिरिनन्दिनि नन्दितमेदिनि विश्वविनोदिनि नन्दनुते
गिरिवरविन्ध्यशिरोधिनिवासिनि विष्णुविलासिनि जिष्णुनुते ।
भगवति हे शितिकण्ठकुटुम्बिनि भूरिकुटुम्बिनि भूरिकृते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।।

2. सुरवरवर्षिणि दुर्धरधर्षिणि दुर्मुखमर्षिणि हर्षरते
त्रिभुवनपोषिणि शङ्करतोषिणि किल्बिषमोषिणि घोषरते ।
दनुजनिरोषिणि दितिसुतरोषिणि दुर्मदशोषिणि सिन्धुसुते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।।

3. अयि जगदम्ब मदम्ब कदम्बवनप्रियवासिनि हासरते
शिखरिशिरोमणितुङ्गहिमालय शृङ्गनिजालयमध्यगते ।
मधुमधुरे मधुकैटभ गञ्जिनि कैटभभञ्जिनि रासरते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।।

4. अयि शतखण्ड विखण्डितरुण्ड वितुण्डितशुण्डगजाधिपते
रिपुगजगण्ड विदारणचण्ड पराक्रमशुण्ड मृगाधिपते ।
निजभुजदण्डनिपातितखण्ड विपातितमुण्डभटाधिपते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।।

5. अयि रणदुर्मद शत्रुवधोदित दुर्धरनिर्जरशक्तिभृते
चतुरविचार धुरीणमहाशिव दूतकृतप्रमथाधिपते ।
दुरितदुरीह दुराशयदुर्मति दानवदूतकृतान्तमते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।।

6. अयि शरणागत वैरिवधूवर वीरवराभयदायकरे
त्रिभुवनमस्तक शूलविरोधि शिरोधिकृतामलशूलकरे ।
दुमिदुमितामर दुन्दुभिनाद महोमुखरीकृततिग्मकरे
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।।

7. अयि निजहुङ्कृति मात्रनिराकृत धूम्रविलोचनधूम्रशते
समरविशोषित शोणितबीज समुद्भवशोणितबीजलते ।
शिवशिव शुम्भनिशुम्भ महाहव तर्पितभूतपिशाचरते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।।

8. धनुरनुसङ्ग रणक्षणसङ्ग परिस्फुरदङ्ग नटत्कटके
कनकपिशङ्ग पृषत्कनिषङ्गरसद्भटशृङ्ग हतावटुके ।
कृतचतुरङ्ग बलक्षितिरङ्ग घटद्बहुरङ्ग रटद्बटुके
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।।

9. जय जय जप्यजये जय शब्दपरस्तुति तत्परविश्वनुते
भण भणभिञ्जिमि भिङ्कृतनूपुर सिञ्जितमोहितभूतपते ।
नटितनटार्ध नटीनटनायक नाटितनाट्यसुगानरते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।।

10. अयि सुमनः सुमनः सुमनः सुमनः सुमनोहरकान्तियुते
श्रितरजनी रजनी रजनी रजनीकर वक्त्रवृते ।
सुनयनविभ्रमर भ्रमरभ्रमर भ्रमर भ्रमराधिपते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।।

11. सहितमहाहव मल्लमतल्लिक मल्लितरल्लक मल्लरते
विरचितवल्लिक पल्लिकमल्लिक भिल्लिकभिल्लिकवर्गवृते ।
सितकृतफुल्ल समुल्लसितारुण तल्लजपल्लवसल्ललिते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।।

12. अविरलगण्ड गलन्मदमेदुर मत्तमतङ्गजराजपते
त्रिभुवनभूषण भूतकलानिधि रूपपयोनिधिराजसुते ।
अयि सुदतीजन लालसमानस मोहनमन्मथराजसुते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।।

13. कमलदलामल कोमलकान्ति कलाकलितामलभाललते
सकलविलास कलानिलयक्रम केलिचलत्कलहंसकुले ।
अलिकुलसङ्कुल कुवलयमण्डलमौलि मिलद्बकुलालिकुले
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।।

14. करमुरलीरववीजितकूजित लज्जितकोकिलमञ्जुमते
मिलितपुलिन्दमनोहरगुञ्जित रञ्जितशैलऽनिकुञ्जगते ।
निजगुणभूतमहाशबरीगण सद्गुणसम्भृतकेलितले
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।।

15. कटितटपीतदुकूलविचित्र मयूखतिरस्कृतचन्द्ररुचे
प्रणतसुरासुर मौलिमणिस्फुरदंशुलसन्नखचन्द्ररुचे ।
जितकनकाचल मौलिपदोर्जितनिर्भरकुञ्जरकुम्भकुचे
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।।

16. विजितसहस्रकरैक सहस्रकरैक सहस्रकरैकनुते
कृतसुरतारक सङ्गरतारक सङ्गरतारकसूनुसुते ।
सुरथसमाधि समानसमाधि समाधिसमाधिसुजातरते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।।

17. पदकमलं करुणानिलये वरिवस्यति योऽनुदिनं स शिवे
अयि कमले कमलानिलये कमलानिलयः स कथं न भवेत् ।
तव पदमेव परम्पदमित्यनुशीलयतो मम किं न शिवे
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।।

18. कनकलसत्कल सिन्धुजलैरनु सिञ्चिनुतेगुणरङ्गभुवं
भजति स किं न शचीकुचकुम्भ तटीपरिरम्भसुखानुभवम् ।
तव चरणं शरणं करवाणि नतामरवाणिनिवासि शिवं
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।।

19. तव विमलेन्दुकुलं वदनेन्दुमलं सकलं ननु कूलयते
किमु पुरुहूतपुरीन्दुमुखी सुमुखीभिरसौ विमुखीक्रियते ।
मम तु मतं शिवनामधने भवती कृपया किमुत क्रियते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।।

20. अयि मयि दीनदयालुतया कृपयैव त्वया भवितव्यमुमे
अयि जगतो जननी कृपयासि यथासि तथाऽनुमितासि रते ।
यदुचितमत्र भवत्युररीकुरुतादुरुतापमपाकुरुते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।।

* * *

।। श्री अन्नपूर्णास्तोत्रम् ।।

1. नित्यानन्दकरी वराभयकरी सौन्दर्यरत्नाकरी
निर्धूताखिलघोरपापनिकरी प्रत्यक्षमाहेश्वरी ।
प्रालेयाचलवंशपावनकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी माताऽन्नपूर्णेश्वरी ।।

2. नानारत्नविचित्रभूषणकरी हेमाम्बराडम्बरी
मुक्ताहारविलम्बमान विलसत्वक्षोजकुम्भान्तरी ।
काश्मीरागरुवासिता रुचिकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी माताऽन्नपूर्णेश्वरी ।।

3. योगानन्दकरी रिपुक्षयकरी धर्मैक्यनिष्ठाकरी
चन्द्रार्कानलभासमानलहरी त्रैलोक्यरक्षाकरी ।
सर्वैश्वर्यकरी तपः फलकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी माताऽन्नपूर्णेश्वरी ।।

4. कैलासाचलकन्दरालयकरीगौरीह्युमाशाङ्करी
कौमारी निगमार्थगोचरकरी ओङ्कारबीजाक्षरी ।
मोक्षद्वारकवाटपाटनकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी माताऽन्नपूर्णेश्वरी ।।

5. दृश्यादृश्यविभूतिवाहनकरी ब्रह्माण्डभाण्डोदरी
लीलानाटकसूत्रखेलनकरी विज्ञानदीपाङ्कुरी ।
श्रीविश्वेशमनः प्रसादनकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी माताऽन्नपूर्णेश्वरी ।।

6. उर्वी सर्वजनेश्वरी जयकरी माता कृपासागरी
वेणीनीलसमानकुन्तलधरी नित्यान्नदानेश्वरी ।
साक्षान्मोक्षकरी सदाशुभकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी माताऽन्नपूर्णेश्वरी ।।

7. आदिक्षान्तसमस्तवर्णनकरी शम्भोस्त्रिभावाकरी
काश्मीरा त्रिपुरेश्वरी त्रिनयनी विश्वेश्वरी शर्वरी ।
स्वर्गद्वारकपाटपाटनकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी माताऽन्नपूर्णेश्वरी ।।

8. देवी सर्वविचित्ररत्नरचिता दाक्षायिणी सुन्दरी
वामास्वादुपयोधरा प्रियकरी सौभाग्यमाहेश्वरी ।
भक्ताभीष्टकरी सदाशुभकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी माताऽन्नपूर्णेश्वरी ।।

9. चन्द्रार्कानलकोटिकोटिसदृशी चन्द्रांशुबिम्बाधरी
चन्द्रार्काग्निसमानकुन्तलधरी चन्द्रार्कवर्णेश्वरी ।
मालापुस्तकपाशसाङ्कुशधरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी माताऽन्नपूर्णेश्वरी ।।

10. क्षत्रत्राणकरी महाऽभयकरी माता कृपासागरी
सर्वानन्दकरी सदा शिवकरी विश्वेश्वरी श्रीधरी ।
दक्षाक्रन्दकरी निरामयकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी माताऽन्नपूर्णेश्वरी ।।

11. अन्नपूर्णे सदापूर्णे शङ्करप्राणवल्लभे ।
ज्ञानवैराग्यसिद्ध्यर्थं भिक्षां देहि च पार्वति ।।

12. माता च पार्वती देवी पिता देवो महेश्वरः ।
बान्धवाः शिवभक्ताश्च स्वदेशो भुवनत्रयम् ।।

* * *

।। मीनाक्षीपञ्चरत्नम् ।।

1. उद्यद्भानुसहस्रकोटिसदृशां केयूरहारोज्ज्वलां
बिम्बोष्ठीं स्मितदन्तपङ्क्तिरुचिरां पीताम्बरालङ्कृताम् ।
विष्णुब्रह्मसुरेन्द्रसेवितपदां तत्त्वस्वरूपां शिवां
मीनाक्षीं प्रणतोऽस्मि सन्ततमहं कारुण्यवारांनिधिम् ।।

2. मुक्ताहारलसत्किरीटरुचिरां पूर्णेन्दुवक्त्रप्रभां
शिञ्जन्नूपुरकिङ्किणिमणिधरां पद्मप्रभाभासुराम् ।
सर्वाभीष्टफलप्रदां गिरिसुतां वाणीरमासेवितां
मीनाक्षीं प्रणतोऽस्मि सन्ततमहं कारुण्यवारांनिधिम् ।।

3. श्रीविद्यां शिववामभागनिलयां ह्रीङ्कारमन्त्रोज्ज्वलां
श्रीचक्राङ्कितबिन्दुमध्यवसतिं श्रीमत्सभानायिकाम् ।
श्रीमत्षण्मुखविघ्नराजजननीं श्रीमज्जगन्मोहिनीं
मीनाक्षीं प्रणतोऽस्मि सन्ततमहं कारुण्यवारांनिधिम् ।।

4. श्रीमत्सुन्दरनायिकां भयहरां ज्ञानप्रदां निर्मलां
श्यामाभां कमलासनार्चितपदां नारायणस्यानुजाम् ।
वीणावेणुमृदङ्गवाद्यरसिकां नानाविधामम्बिकां
मीनाक्षीं प्रणतोऽस्मि सन्ततमहं कारुण्यवारांनिधिम् ।।

5. नानायोगिमुनीन्द्रहृत्सुवसतीं नानार्थसिद्धिप्रदां
नानापुष्पविराजिताङ्घ्रियुगलां नारायणेनार्चिताम् ।
नादब्रह्ममयीं परात्परतरां नानार्थतत्त्वात्मिकां
मीनाक्षीं प्रणतोऽस्मि सन्ततमहं कारुण्यवारांनिधिम् ।।

* * *

।। श्री गङ्गास्तोत्रम् ।।

1. देवि सुरेश्वरि भगवति गङ्गे त्रिभुवनतारिणि तरलतरङ्गे ।
शङ्करमौलिविहारिणि विमले मम मतिरास्तां तव पद कमले ।।

2. भागीरथि सुखदायिनि मातः तव जलमहिमा निगमे ख्यातः ।
नाहं जाने तव महिमानं पाहि कृपामयि मामज्ञानम् ।।

3. हरिपदपाद्यतरङ्गिणि गङ्गे हिमविधुमुक्ताधवलतरङ्गे ।
दूरीकुरु मम दुष्कृतिभारं कुरु कृपया भवसागरपारम् ।।

4. तव जलममलं येन निपीतं परमपदं खलु तेन गृहीतम् ।
मातर्गङ्गे त्वयि यो भक्तः किल तं द्रष्टुं न यमः शक्तः ।।

5. पतितोद्धारिणि जाह्नवि गङ्गे खण्डितगिरिवरमण्डितभङ्गे ।
भीष्मजननि हे मुनिवरकन्ये पतितनिवारिणि त्रिभुवनधन्ये ।।

6. कल्पलतामिवफलदां लोके प्रणमति यस्त्वां न पतति शोके ।
पारावारविहारिणि गङ्गे विमुखयुवतिकृततरलापाङ्गे ।।

7. तव चेन्मातःस्रोतःस्नातःपुनरपि जठरे सोऽपि न जातः ।
नरकनिवारिणि जाह्नवि गङ्गे कलुषविनाशिनि महिमोत्तुङ्गे ।।

8. पुनरसदङ्गे पुण्यतरङ्गे जय जय जाह्नवि करुणापाङ्गे ।
इन्द्रमुकुटमणिराजितचरणे सुखदे शुभदे भृत्यशरण्ये ।।

9. रोगं शोकं तापं पापं हर मे भगवति कुमतिकलापम् ।
त्रिभुवनसारे वसुधाहारे त्वमसि गतिर्मम खलु संसारे ।।

10. अलकानन्दे परमानन्दे कुरु करुणामयि कातरवन्द्ये ।
तवतटनिकटे यस्य निवासःखलु वैकुण्ठे तस्य निवासः ।।

11. वरमिह नीरे कमठो मीनःकिं वा तीरे शरटःक्षीणः ।
अथवा श्वपचो मलिनो दीनःतव न हि दूरे नृपतिकुलीनः ।।

12. भो भुवनेश्वरि पुण्ये धन्ये देवि द्रवमयिमुनिवरकन्ये ।
गङ्गास्तवमिममलं नित्यं पठति नरो यःस जयति सत्यम् ।।

13. येषां हृदये गङ्गाभक्तिस्तेषां भवति सदा सुखमुक्तिः ।
मधुराकान्ता पञ्झटिकाभिःपरमानन्दकलितललिताभिः ।।

14. गङ्गास्तोत्रमिदं भवसारं वाञ्छितफलदं विमलं सारम् ।
शङ्करसेवकशङ्कररचितं पठति सुखीस्तव इति च समाप्तः ।।

जय जय गंगे जयहर गंगे.....

* * *

।। देव्यपराधक्षमापणस्तोत्रम् ।।

1. न मन्त्रं नो यन्त्रं तदपि च न जाने स्तुतिमहो
न चाह्वानं ध्यानं तदपि च न जाने स्तुतिकथाः ।
न जाने मुद्रास्ते तदपि च न जाने विलपनं
परं जाने मातस्त्वदनुसरणं क्लेशहरणम् ।।

2. विधेरज्ञानेन द्रविणविरहेणालसतया
विधेयाशक्यत्वात्तव चरणयोर्या च्युतिरभूत् ।
तदेतत्क्षन्तव्यं जननि सकलोद्धारिणि शिवे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ।।

3. पृथिव्यां पुत्रास्ते जननि बहवः सन्ति सरलाः
परं तेषां मध्ये विरलतरलोऽहं तव सुतः ।
मदीयोऽयं त्यागः समुचितमिदं नो तव शिवे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ।।

4. जगन्मातर्मातस्तव चरणसेवा न रचिता
न वा दत्तं देवि द्रविणमपि भूयस्तव मया ।
तथापि त्वं स्नेहं मयि निरुपमं यत्प्रकुरुषे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ।।

5. परित्यक्ता देवा: विविधविधिसेवाकुलतया
मया पञ्चाशीतेरधिकमपनीते तु वयसि ।
इदानीं चेन्मातस्तव यदि कृपा नापि भविता
निरालम्बो लम्बोदरजननि कं यामि शरणम् ।।

6. श्वपाको जल्पाको भवति मधुपाकोपमगिरा
निरातङ्को रङ्को विहरति चिरं कोटिकनकैः ।
तवापर्णे कर्णे विशति मनुवर्णे फलमिदं
जनः को जानीते जननि जपनीयं जपविधौ ।।

7. चिताभस्मालेपो गरलमशनं दिक्पटधरो
जटाधारी कण्ठे भुजगपतिहारी पशुपतिः ।
कपाली भूतेशो भजति जगदीशैकपदवीं
भवानि त्वत्पाणिग्रहणपरिपाटीफलमिदम् ।।

8. न मोक्षस्याकाङ्क्षा न च विभववाञ्छापि च न मे
न विज्ञानापेक्षा शशिमुखि सुखेच्छापि न पुनः ।
अतस्त्वां संयाचे जननि जननं यातु मम वै
मृडानी रुद्राणी शिव शिव भवानीति जपतः ।।

9. नाराधितासि विधिना विविधोपचारैः
किं रूक्षचिन्तनपरैर्न कृतं वचोभिः ।
श्यामे त्वमेव यदि किञ्चन मय्यनाथे
धत्से कृपामुचितमम्ब परं तवैव ।।

10. आपत्सु मग्नः स्मरणं त्वदीयं करोमि दुर्गे करुणार्णवेशि ।
नैतच्छठत्वं मम भावयेथाः क्षुधातृषार्ता जननीं स्मरन्ति ।।

11. जगदम्ब विचित्रमत्र किं परिपूर्णा करुणास्ति चेन्मयि ।
अपराधपरम्परावृतं न हि माता समुपेक्षते सुतम् ।।

12. मत्समः पातकी नास्ति पापघ्नी त्वत्समा न हि ।
एवं ज्ञात्वा महादेवि यथायोग्यं तथा कुरु ।।

* * *

।। भवान्यष्टकम् ।।

1. न तातो न माता न बन्धुर्न दाता न पुत्रो न पुत्री न भृत्यो न भर्ता ।
न जाया न विद्या न वृत्तिर्ममैव गतिस्त्वं गतिस्त्वं त्वमेका भवानि ।।

2. भवाब्धावपारे महादुःखभीरु पपात प्रकामी प्रलोभी प्रमत्तः ।
कुसंसारपाशप्रबद्धः सदाहं गतिस्त्वं गतिस्त्वं त्वमेका भवानि ।।

3. न जानामि दानं न च ध्यानयोगं न जानामि तन्त्रं न च स्तोत्रमन्त्रम्।
न जानामि पूजां न च न्यासयोगं गतिस्त्वं गतिस्त्वं त्वमेका भवानि ।।

4. न जानामि पुण्यं न जानामि तीर्थं न जानामि मुक्तिं लयं वा कदाचित् ।
न जानामि भक्तिं व्रतं वापि मातर्गतिस्त्वं गतिस्त्वं त्वमेका भवानि ।।

5. कुकर्मी कुसङ्गी कुबुद्धिः कुदासः कुलाचारहीनः कदाचारलीनः ।
कुदृष्टिः कुवाक्यप्रबन्धः सदाहं गतिस्त्वं गतिस्त्वं त्वमेका भवानि ।।

6. प्रजेशं रमेशं महेशं सुरेशं दिनेशं निशीथेश्वरं वा कदाचित् ।
न जानामि चान्येसदाहं शरण्ये गतिस्त्वं गतिस्त्वं त्वमेका भवानि ।।

7. विवादे विषादे प्रमादे प्रवासे जले चानले पर्वते शत्रुमध्ये ।
अरण्ये शरण्ये सदा मां प्रपाहि गतिस्त्वं गतिस्त्वं त्वमेका भवानि ।।

8. अनाथो दरिद्रो जरारोगयुक्तो महाक्षीणदीनः सदा जाड्यवक्त्रः ।
विपत्तौ प्रविष्टः प्रनष्टः सदाहं गतिस्त्वं गतिस्त्वं त्वमेका भवानि ।।

* * *

।। आदित्यहृदयम् ।।

1. ततो युद्धपरिश्रान्तं समरे चिन्तया स्थितम् ।
रावणं चाग्रतो दृष्ट्वा युद्धाय समुपस्थितम् ।।

2. दैवतैश्च समागम्य द्रष्टुमभ्यागतो रणम् ।
उपागम्याब्रवीद्राममगस्त्यो भगवान् ऋषिः ।।

3. राम राम महाबाहो शृणु गुह्यं सनातनम् ।
येन सर्वानरीन्वत्स समरे विजयिष्यसि ।।

4. आदित्यहृदयं पुण्यं सर्वशत्रुविनाशनम् ।
जयावहं जपेन्नित्यम् अक्षय्यं परमं शिवम् ।।

5. सर्वमङ्गलमाङ्गल्यं सर्वपापप्रणाशनम् ।
चिन्ताशोकप्रशमनम् आयुर्वर्धनमुत्तमम् ।।

6. रश्मिमन्तं समुद्यन्तं देवासुरनमस्कृतम् ।
पूजयस्व विवस्वन्तं भास्करं भुवनेश्वरम् ।।

7. सर्वदेवात्मको ह्येषः तेजस्वी रश्मिभावनः ।
एष देवासुरगणान् लोकान् पाति गभस्तिभिः ।।

8. एष ब्रह्मा च विष्णुश्च शिवः स्कन्दः प्रजापतिः ।
महेन्द्रो धनदः कालो यमः सोमो ह्यपां पतिः ।।

9. पितरो वसवः साध्या ह्यश्विनौ मरुतो मनुः ।
वायुर्वह्निः प्रजाप्राणः ऋतुकर्ता प्रभाकरः ।।

10. आदित्यः सविता सूर्यः खगः पूषा गभस्तिमान् ।
सुवर्णसदृशो भानुर्हिरण्यरेता दिवाकरः ।।

11. हरिदश्वः सहस्रार्चिः सप्तसप्तिर्मरीचिमान् ।
तिमिरोन्मथनः शम्भुस्त्वष्टा मार्ताण्ड अंशुमान् ।।

12. हिरण्यगर्भः शिशिरस्तपनो भास्करो रविः ।
अग्निगर्भोऽदितेः पुत्रः शङ्खः शिशिरनाशनः ।।

13. व्योमनाथस्तमोभेदी ऋग्यजुःसामपारगः ।
घनवृष्टिरपां मित्रो विन्ध्यवीथीप्लवङ्गमः ।।

14. आतपी मण्डली मृत्युः पिङ्गलः सर्वतापनः ।
कविर्विश्वो महातेजाः रक्तः सर्वभवोद्भवः ।।

15. नक्षत्रग्रहताराणामधिपो विश्वभावनः ।
तेजसामपि तेजस्वी द्वादशात्मन्नमोऽस्तु ते ।।

16. नमः पूर्वाय गिरये पश्चिमायाद्रये नमः ।
ज्योतिर्गणानां पतये दिनाधिपतये नमः ।।

17. जयाय जयभद्राय हर्यश्वाय नमो नमः ।
नमो नमः सहस्रांशो आदित्याय नमो नमः ।।

18. नम उग्राय वीराय सारङ्गाय नमो नमः ।
नमः पद्मप्रबोधाय मार्ताण्डाय नमो नमः ।।

19. ब्रह्मेशानाच्युतेशाय सूर्यायादित्यवर्चसे ।
भास्वते सर्वभक्षाय रौद्राय वपुषे नमः ।।

20. तमोघ्नाय हिमघ्नाय शत्रुघ्नायामितात्मने ।
कृतघ्नघ्नाय देवाय ज्योतिषां पतये नमः ।।

21. तप्तचामीकराभाय वह्नये विश्वकर्मणे ।
नमस्तमोऽभिनिघ्नाय रुचये लोकसाक्षिणे ।।

22. नाशयत्येष वै भूतं तदेव सृजति प्रभुः ।
पायत्येष तपत्येष वर्षत्येष गभस्तिभिः ।।

23. एष सुप्तेषु जागर्ति भूतेषु परिनिष्ठितः ।
एष चैवाग्निहोत्रं च फलं चैवाग्निहोत्रिणाम् ।।

24. वेदाश्च क्रतवश्चैव क्रतूनां फलमेव च ।
यानि कृत्यानि लोकेषु सर्व एष रविः प्रभुः ।।

25. एनमापत्सु कृच्छ्रेषु कान्तारेषु भयेषु च ।
कीर्तयन्पुरुषः कश्चिन्नावसीदति राघव ।।

26. पूजयस्वैनमेकाग्रो देवदेवं जगत्पतिम् ।
एतत्त्रिगुणितं जप्त्वा युद्धेषु विजयिष्यसि ।।

27. अस्मिन्क्षणे महाबाहो रावणं त्वं वधिष्यसि ।
एवमुक्त्वा तदागस्त्यो जगाम च यथागतम् ।।

28. एतच्छ्रुत्वा महातेजा नष्टशोकोऽभवत्तदा ।
धारयामास सुप्रीतो राघवः प्रयतात्मवान् ।।

29. आदित्यं प्रेक्ष्य जप्त्वा तु परं हर्षमवाप्तवान् ।
त्रिराचम्य शुचिर्भूत्वा धनुरादाय वीर्यवान् ।।

30. रावणं प्रेक्ष्य हृष्टात्मा युद्धाय समुपागमत् ।
सर्वयत्नेन महता वधे तस्य धृतोऽभवत् ।।

31. अथ रविरवदन्निरीक्ष्य रामं मुदितमनाः परमं प्रहृष्यमाणः ।
निशिचरपतिसंक्षयं विदित्वा सुरगणमध्यगतो वचस्त्वरेति ।।

* * *

।। उपदेशसारम् ।।

1. कर्तुराज्ञया प्राप्यते फलम् ।
कर्म किं परं कर्म तज्जडम् ।।

2. कृतिमहोदधौ पतनकारणम् ।
फलमशाश्वतं गतिनिरोधकम् ।।

3. ईश्वरार्पितं नेच्छया कृतम् ।
चित्तशोधकं मुक्तिसाधकम् ।।

4. कायवाङ्मनःकार्यमुत्तमम् ।
पूजनं जपश्चिन्तनं क्रमात् ।।

5. जगत ईशधीयुक्तसेवनम् ।
अष्टमूर्तिभृद्देवपूजनम् ।।

6. उत्तमस्तवादुच्चमन्दतः ।
चित्तजं जपध्यानमुत्तमम् ।।

7. आज्यधारया स्रोतसा समम् ।
सरलचिन्तनं विरलतः परम् ।।

8. भेदभावनात्सोऽहमित्यसौ ।
भावनाऽभिदा पावनी मता ।।

9. भावशून्यसद्भावसुस्थितिः ।
भावनाबलाद्भक्तिरुत्तमा ।।

10. हृत्स्थले मनः स्वस्थता क्रिया ।
भक्तियोगबोधाश्च निश्चितम् ।।

11. वायुरोधनाल्लीयते मनः ।
जालपक्षिवद्रोधसाधनम् ।।

12. चित्तवायवश्चित्क्रियायुताः ।
शाखयोर्द्वयी शक्तिमूलका ।।

13. लयविनाशने उभयरोधने ।
लयगतं पुनर्भवति नो मृतम् ।।

14. प्राणबन्धनाल्लीनमानसम् ।
एकचिन्तनान्नाशमेत्यदः ।।

15. नष्टमानसोत्कृष्टयोगिनः ।
कृत्यमस्ति किं स्वस्थितिं यतः ।।

16. दृश्यवारितं चित्तमात्मनः ।
चित्वदर्शनं तत्त्वदर्शनम् ।।

17. मानसं तु किं मार्गणे कृते ।
नैव मानसं मार्ग आर्जवात् ।।

18. वृत्तयस्त्वहं वृत्तिमाश्रिताः ।
वृत्तयो मनो विद्ध्यहं मनः ।।

19. अहमयं कुतो भवति चिन्वतः ।
अयि पतत्यहं निजविचारणम् ।।

20. अहमिनाशभाज्यहमहंतया ।
स्फुरति हृत्स्वयं परमपूर्णसत् ।।

21. इदमहंपदाऽभिख्यमन्वहम् ।
अहमि लीनकेऽप्यलयसत्तया ।।

22. विग्रहेन्द्रियप्राणधीतमः ।
नाहमेकसत्तज्जडं ह्यसत् ।।

23. सत्त्वभासिका चित्कवेतरा ।
सत्तया हि चिच्चित्तयाह्यहम् ।।

24. ईशजीवयोर्वेषधीभिदा ।
सत्स्वभावतो वस्तु केवलम् ।।

25. वेषहानतः स्वात्मदर्शनम् ।
ईशदर्शनं स्वात्मरूपतः ।।

26. आत्मसंस्थितिः स्वात्मदर्शनम् ।
आत्मनिर्द्वयादात्मनिष्ठता ।।

27. ज्ञानवर्जिताऽज्ञानहीनचित् ।
ज्ञानमस्ति किं ज्ञातुमन्तरम् ।।

28. किंस्वरूपमित्यात्मदर्शने ।
अव्ययाऽभवाऽऽपूर्णचित्सुखम् ।।

29. बन्धमुक्त्यतीतं परं सुखम् ।
विन्दतीह जीवस्तु दैविकः ।।

30. अहमपेतकं निजविभानकम् ।
महदिदं तपो रमणवागियम् ।।

* * *

।। भज गोविन्दम् ।।

1. भजगोविन्दं भजगोविन्दं गोविन्दं भजमूढमते ।
सम्प्राप्ते सन्निहिते काले नहि नहि रक्षति डुकृञ्करणे ।।

2. मूढ जहीहि धनागमतृष्णां कुरु सद्बुद्धिं मनसि वितृष्णाम् ।
यल्लभसे निजकर्मोपात्तं वित्तं तेन विनोदय चित्तम् ।।

3. नारीस्तनभरनाभीदेशं दृष्ट्वा मा गा मोहावेशम् ।
एतन्मांसवसादि विकारं मनसि विचिन्तय वारं वारम् ।।

4. नलिनीदलगतजलमतितरलं तद्वज्जीवितमतिशयचपलम् ।
विद्धि व्याध्यभिमानग्रस्तं लोकं शोकहतं च समस्तम् ।।

5. यावद्वित्तोपार्जनसक्तस्तावन्निजपरिवारो रक्तः ।
पश्चाज्जीवति जर्जरदेहे वार्तां कोऽपि न पृच्छति गेहे ।।

6. यावत्पवनो निवसति देहे तावत्पृच्छति कुशलं गेहे ।
गतवति वायौ देहापाये भार्या बिभ्यति तस्मिन्काये ।।

7. बालस्तावत्क्रीडासक्तः तरुणस्तावत्तरुणीसक्तः ।
वृद्धस्तावच्चिन्तासक्तः परमे ब्रह्मणि कोऽपि न सक्तः ।।

8. का ते कान्ता कस्ते पुत्रः संसारोऽयमतीव विचित्रः ।
कस्य त्वं कः कुत आयातः तत्त्वं चिन्तय तदिह भ्रातः ।।

9. सत्सङ्गत्वे निस्सङ्गत्वं निस्सङ्गत्वे निर्मोहत्वम् ।
निर्मोहत्वे निश्चलतत्त्वं निश्चलतत्त्वे जीवन्मुक्तिः ।।

10. वयसिगते कः कामविकारः शुष्के नीरे कः कासारः ।
क्षीणेवित्ते कः परिवारः ज्ञाते तत्त्वे कः संसारः ।।

11. मा कुरु धनजनयौवनगर्वं हरति निमेषात्कालः सर्वम् ।
मायामयमिदमखिलं बुद्ध्वा ब्रह्मपदं त्वं प्रविश विदित्वा ।।

12. दिनयामिन्यौ सायं प्रातः शिशिरवसन्तौ पुनरायातः ।
कालः क्रीडति गच्छत्यायुः तदपि न मुञ्चत्याशावायुः ।।

13. का ते कान्ता धनगतचिन्ता वातुल किं तव नास्ति नियन्ता ।
त्रिजगति सज्जनसंगतिरेका भवति भवार्णवतरणे नौका ।।

14. जटिलो मुण्डी लुञ्चितकेशः काषायाम्बरबहुकृतवेषः ।
पश्यन्नपि च न पश्यति मूढः ह्युदरनिमित्तं बहुकृतवेषः ।।

15. अङ्गं गलितं पलितं मुण्डं दशनविहीनं जातं तुण्डम् ।
वृद्धो याति गृहीत्वा दण्डं तदपि न मुञ्चत्याशापिण्डम् ।।

16. अग्रे वह्निः पृष्ठेभानुः रात्रौ चुबुकसमर्पितजानुः ।
करतलभिक्षस्तरुतलवासः तदपि न मुञ्चत्याशापाशः ।।

17. कुरुते गङ्गासागरगमनं व्रतपरिपालनमथवा दानम् ।
ज्ञानविहीनः सर्वमतेन भजति न मुक्तिं जन्मशतेन ।।

18. सुरमंदिरतरुमूलनिवासः शय्या भूतलमजिनं वासः ।
सर्वपरिग्रहभोगत्यागः कस्य सुखं न करोति विरागः ।।

19. योगरतो वा भोगरतो वा सङ्गरतो वा सङ्गविहीनः ।
यस्य ब्रह्मणि रमते चित्तं नन्दति नन्दति नन्दत्येव ।।

20. भगवद्गीता किञ्चिदधीता गङ्गा जललवकणिका पीता ।
सकृदपि येन मुरारि समर्चा क्रियते तस्य यमेन न चर्चा ।।

21. पुनरपि जननं पुनरपि मरणं पुनरपि जननीजठरे शयनम् ।
इह संसारे बहुदुस्तारे कृपयाऽपारे पाहि मुरारे ।।

22. रथ्याचर्पटविरचितकन्थः पुण्यापुण्यविवर्जितपन्थः ।
योगी योगनियोजितचित्तो रमते बालोन्मत्तवदेव ।।

23. कस्त्वं कोऽहं कुत आयातः का मे जननी को मे तातः ।
इति परिभावय सर्वमसारम् विश्वं त्यक्त्वा स्वप्नविचारम् ।।

24. त्वयि मयि चान्यत्रैको विष्णुः व्यर्थं कुप्यसि मय्यसहिष्णुः ।
भव समचित्तः सर्वत्र त्वं वाञ्छस्यचिराद्यदि विष्णुत्वम् ।।

25. शत्रौ मित्रे पुत्रे बन्धौ मा कुरु यत्नं विग्रहसन्धौ ।
सर्वस्मिन्नपि पश्यात्मानं सर्वत्रोत्सृज भेदाज्ञानम् ।।

26. कामं क्रोधं लोभं मोहं त्यक्त्वाऽऽत्मानं पश्यति सोऽहम् ।
आत्मज्ञानविहीना मूढाः ते पच्यन्ते नरकनिगूढाः ।।

27. गेयं गीतानामसहस्रं ध्येयं श्रीपतिरूपमजस्रम् ।
नेयं सज्जनसङ्गे चित्तं देयं दीनजनाय च वित्तम् ।।

28. सुखतः क्रियते रामाभोगः पश्चाद्धन्त शरीरे रोगः ।
यद्यपि लोके मरणं शरणं तदपि न मुञ्चति पापाचरणम् ।।

29. अर्थमनर्थं भावय नित्यं नास्तिततः सुखलेशः सत्यम् ।
पुत्रादपि धनभाजां भीतिः सर्वत्रैषा विहिता रीतिः ।।

30. प्राणायामं प्रत्याहारं नित्यानित्यविवेकविचारम् ।
जाप्यसमेतसमाधिविधानं कुर्ववधानं महदवधानम् ।।

31. गुरुचरणाम्बुजनिर्भरभक्तः संसारादचिराद्भव मुक्तः ।
सेन्द्रियमानसनियमादेवं द्रक्ष्यसि निज हृदयस्थं देवम् ।।

* * *

।। निर्वाणषट्कम् ।।

1. मनोबुद्ध्यहङ्कारचित्तानि नाहं न च श्रोत्रजिह्वे न च घ्राणनेत्रे ।
न च व्योमभूमिःन तेजो न वायुः चिदानन्दरूपःशिवोऽहं शिवोऽहम् ।।

2. न च प्राणसंज्ञो न वै पञ्चवायुः न वा सप्तधातुर्न वा पञ्चकोशः ।
न वाक्पाणिपादं न चोपस्थपायू चिदानन्दरूपःशिवोऽहं शिवोऽहम् ।।

3. न मे द्वेषरागौ न मे लोभमोहौ नमे वैमदो नैव मात्सर्यभावः ।
न धर्मो न चार्थो न कामो न मोक्षः चिदानन्दरूपः शिवोऽहं शिवोऽहम् ।।

4. न पुण्यं न पापं न सौख्यं न दुःखं न मन्त्रो न तीर्थं न वेदा न यज्ञाः ।
अहं भोजनं नैव भोज्यं न भोक्ता चिदानन्दरूपःशिवोऽहं शिवोऽहम् ।।

5. न मृत्युर्न शङ्का न मे जातिभेदः पिता नैव मे नैव माता न जन्म ।
न बन्धुर्नमित्रं गुरुर्नैव शिष्यः चिदानन्दरूपःशिवोऽहं शिवोऽहम् ।।

6. अहं निर्विकल्पो निराकाररूप: विभुत्वाच्च सर्वत्र सर्वेन्द्रियाणाम् ।
न चासङ्गतं नैव मुक्तिर्न मेय: चिदानन्दरूपःशिवोऽहं शिवोऽहम् ।।

* * *

।। मङ्गलाष्टकम् ।।

1. श्रीमत्पङ्कजविष्टरौ हरिहरौ वायुर्महेन्द्रोऽनलः
चन्द्रोभास्करवित्तपालवरुणा धर्माधिराजोग्रहाः ।
प्रद्युम्नो नलकूबरःसुरगजश्चिन्तामणिःकौस्तुभः
स्वामी शक्तिधरस्तु लाङ्गलधरःकुर्वन्तु नो मङ्गलम् ।।

2. गौरी श्रीरदितिश्च कद्रुसुभगा भूतिः सुपर्णी शुभा
सावित्री तु सरस्वती वसुमती द्रौपद्यहल्यासती ।
स्वाहा जाम्बवती सुस्क्मभगिनी दुःस्वप्नविध्वंसिनी
वेला चाम्भुनिधेः सुमीनमकराः कुर्वन्तु नो मङ्गलम् ।।

3. नेत्राणां त्रितयं शिवं पशुपतेरग्नित्रयं पावनम्
यत्तद्विष्णुपदत्रयं त्रिभुवनं ख्यातञ्च रामत्रयम् ।
गङ्गावाहपथत्रयं सुविमलं वेदत्रयं ब्राह्मणम्
सन्ध्यानां त्रितयं द्विजैः सुविहितं कुर्वन्तु नो मङ्गलम् ।।

4. अश्वत्थो वटवृक्षचन्दनतरुर्मन्दारकल्पद्रुमौ
जम्बूनिम्बकदम्बचूतसरला वृक्षाश्च ये क्षीरिणः ।
सर्वे ते फलसंयुताः प्रतिदिनं विभ्राजनं राजते
रम्यं चैत्ररथञ्च नन्दनवनं कुर्वन्तु नो मङ्गलम् ।।

5. वाल्मीकिः सनकः सनन्दनतरुर्व्यासो वसिष्ठो भृगुः
जाबालिर्जमदग्निकच्छजनका गर्गोङ्गिरा गौतमः ।
मान्धाता ऋतुपर्णवैनसगरा धन्यो दिलीपो नलः
पुण्यो धर्मसुतो ययातिनहुषौ कुर्वन्तु नो मङ्गलम् ।।

6. ब्रह्मा वेदपतिः शिवः पशुपतिः सूर्यश्च चक्षुष्पतिः
शक्रो देवपतिर्यमः पितृपतिः स्कन्दश्च सेनापतिः ।
यक्षो वित्तपतिर्हरिश्च जगतां वायुः पतिः प्राणिनाम्
इत्येते पतयः समेत्य सततं कुर्वन्तु नो मङ्गलम् ।।

7. गङ्गा सिन्धु सरस्वती च यमुना गोदावरी नर्मदा
कावेरी सरयूर्महेन्द्रतनया चर्मण्वती वेदिका ।
क्षिप्रा वेत्रवती महासुरनदी ख्याता च या गण्डकी
पूर्णा पूर्णजलैः समुद्रसहिताः कुर्वन्तु नो मङ्गलम् ।।

8. लक्ष्मीः कौस्तुभपारिजातकसुरा धन्वन्तरिश्चन्द्रमाः
गावः कामदुघा सुरेश्वरगजो रम्भादिदेवाङ्गनाः ।
अश्वः सप्तमुखः सुधा हरिधनुः शङ्खो विषं चाम्बुधेः
रत्नानीति चतुर्दशप्रतिदिनं कुर्वन्तु नो मङ्गलम् ।।

9. इत्येतद्वरमङ्गलाष्टकमिदं पापौघविध्वंसनम्
पुण्यं सम्प्रति कालिदासकविना विप्रप्रबन्धीकृतम् ।
यः प्रातः श्रुणुयात्समाहितमना नित्यं पठेद्भक्तिमान्
गङ्गासागरसङ्गमे प्रतिदिनं प्राप्नोत्यसौ मङ्गलम् ।।

* * *

।। पूर्णकुंभमन्त्राः ।।

1. न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः ।
परेण नाकं निहितं गुहायां विभ्राजते यद्यतयो विशन्ति ।।

2. वेदान्तविज्ञानसुनिश्चितार्थाःसन्न्यासयोगाद्यतयःशुद्धसत्त्वाः ।
ते ब्रह्मलोकेषु परान्तकाले परामृता परिमुच्यन्ति सर्वे ।।

3. दहं विपापं परमेश्मभूतं यत्पुण्डरीकं पुरमद्यसँ स्थम् ।
तत्रापि दहं गगनं विशोकस्तस्मिन् यदन्तस्तदुपासितव्यम् ।।

4. यो वेदादौ स्वरःप्रोक्तो वेदान्ते च प्रतिष्ठितः ।
तस्य प्रकृतिलीनस्य यःपरस्स महेश्वरः ।।

ॐशान्तिःशान्तिःशान्तिः

PUBLICATIONS OF AKSHARA VIDYA TRUST

A. NADAYOGA MP3 CD/TAPES

1. Stotramala
2. Bhajanavali
3. Bhagavad Gita Parayanam

B. DISCOURSES (English) MP3 CD/TAPES

I. 1. Bhagavad Gita (Chapter wise)
2. Bhagavad Gita Bhashyam
3. Summary of Bhagavad Gita 18 Chapters

II. Upanishads

1. Mundakopanishad
2. Kenopanishad
3. Kathopanishad
4. Prasnopanishad
5. Kaivalyopanishad
6. Isavasyopanishad
7. Taittiriyopanishad
8. Mandukyopanishad
9. Chandogyopanishad
10. Brihadaranyakopanishad
11. Aitareyopanishad

12. Swetaswaratara Upanishad
13. Summary of Upanishads

III. Upanishad Bhashyam

1. Mundaka Upanishad Bhashyam

IV. Brahma Sutras

V. Prakarana Granthas

1. Aditya Hridayam & Patanjanli Yoga Sutras
2. Advaita Makarandam
3. Aparokshanubhuti
4. Ashtavakra Gita
5. Bhajagovindam
6. Dakshinamurthi Stotram
7. Dakshinamurthi Stotram with Manasollasa
8. Deep Relaxation Technique & Introduction to Yoga
9. DrikDrisyaViveka
10. Eka Sloki, Vidura Neeti & Concept of Health & Yoga
11. Guru Stotram
12. Hastamalakiyam & Nirvana Shatkam
13. JivaYatra & Sadhana Panchakam

14. Kamalajadaitashtakam
15. Kapila Gita
16. Narada Bhakti Sutras
17. Panchadasi
18. Rama Gita
19. Saddarshanam
20. Sanat Sujatiyam
21. Shivananda Lahari
22. Shivaparadha Kshamapana Stotram/Gayatri Mantram
23. Tattva Bodha
24. Uddhava Gita
25. Upadesa sahasri
26. UpadesaSaram
27. VairagyaSatakam & Guided Meditation
28. Vakya Vritti
29. Vedanta Dindima
30. Vedantasara
31. Vishnu Sahasranama
32. Viveka Chudamani

VI. General Talks

1. Gurupurnima Talks
2. Shivaratri Talks
3. Dayananda Panchakam
4. Kasi Panchakam

VII. Videos

1. Bhishma Sandesham (Telugu)
2. Yogasanas (English)
3. Nadopasana
    1. Mind Management - Part 1 to 4

C. DISCOURSES (Telugu) MP3 CD/Tapes

I. Bhagavad Gita (18 Chapters)

II. Bhagavad Gita Bhashyam

III. Upanishads

1. Mundakopanishad
2. Kenopanishad
3. Kathopanishad
4. Kaivalyopanishad
5. Isavasyopanishad

6. Taittiriyopanishad
7. Mandukyopanishad
8. Aitareya Upanishad
9. Prasnopanishad
10. Chandogyopanishad

IV. Prakarana Granthas

1. Atma Bodha
2. Bhaja Govindam
3. Narada Bhakti Sutras
4. Sri Rama Gita
5. Tattva Bodha
6. Viveka Chudamani
7. Vishnu Sahasra Nama

D. BOOKS

I. English

1. Karmayoga
2. Varnasrama Dharma
3. Mantra Japa
4. Ishwara Swarupam, Part-1
5. Acharya Devobhava

II. Telugu

1. Prarthana
2. Karmayoga
3. Varnasrama Dharma
4. Ishwaraswarupam – Part 1
5. Ishwaraswarupam – Part 2
6. Mantrajapa
7. Acharya Devo Bhava
8. Ashtanga Yoga
9. Nadayoga - Stotramala
10. Nadayoga - Bhajanavali

III. Tamil

1. Nadayoga - Stotramala
2. Nadayoga - Bhajanavali
3. Karmayoga
4. Varnashramadharma
5. Mantra Japa

IV. Sanskrit

1. Nadayoga - Stotramala